ऋजुपाठम्

ईश्वरचन्द्रविद्यासागरप्रणीतम्।

द्वितीयो भागः।

अभिनवसंस्करणम्।

PUBLISHED BY
SIDDHESWAR PAN,
"SIDDHESWAR PRESS DEPOSITORY,"
66, COLLEGE STREET, CALCUTTA.
1909.

Calcutta:

PRINTED BY ABINASH CHANDRA MANDAL
AT THE "SIDDHESWAR MACHINE PRESS"
13, Shibnarayan Dass's Lane.

1909.

বিজ্ঞাপন

—*—

ঋজুপাঠের দ্বিতীয় ভাগ রামায়ণ হইতে সংগৃহীত হইল। রচনা-প্রণালী দৃষ্টে স্পষ্ট প্রতীতি জন্মে, রামায়ণ অতি প্রাচীন গ্রন্থ। এই প্রাচীন গ্রন্থ মহর্ষি বাল্মীকি প্রণীত বলিয়া প্রসিদ্ধি আছে। কোনও কোনও আলঙ্কারিকেরা রামায়ণকে মহাকাব্য মধ্যে গণনা করিয়া থাকেন। কিন্তু তাঁহারা তাদৃশ কাব্যের যে সকল লক্ষণ নির্দ্দেশ করিয়াছেন, তৎসমুদায় কালিদাসাদি প্রণীত রঘুবংশাদি অপেক্ষাকৃত নব্য কাব্যগ্রন্থসমূহে যেরূপ লক্ষিত হয়, প্রাচীন কাব্য রামায়ণে সেরূপ লক্ষিত হয় না। বাল্মীকিকাব্যে পৌনরুক্ত্য, প্রাসঙ্গিক বিষয়ের অতি বিস্তৃত বর্ণনা প্রভৃতি কতিপয় গুরুতর দোষ আছে। যাহা হউক, অনায়াসে এই নির্দ্দেশ করা যাইতে পারে, সংস্কৃত ভাষায় এরূপ প্রাঞ্জল ও প্রসাদগুণবিশিষ্ট পদ্য গ্রন্থ আর নাই। রামায়ণের মধ্যে অযোধ্যাকাণ্ডের রচনা যেরূপ চমৎকারিণী ও চিত্তহারিণী অন্যান্য কাণ্ডের রচনা সেরূপ নহে। এই নিমিত্ত ঋজুপাঠের দ্বিতীয় ভাগে অযোধ্যাকাণ্ডের কতিপয় উৎকৃষ্ট অংশ সঙ্কলিত হইল। সঙ্কলিত অংশ সকলের কোনও কোনও ভাগ অনাবশ্যক বোধে পরিত্যক্ত হইয়াছে।

শ্রীঈশ্বরচন্দ্র শর্ম্মা

কলিকাতা। সংস্কৃত কালেজ।

২২এ ফাল্গুন। সংবৎ ১৯০৮।

ষষ্ঠ সংস্করণের বিজ্ঞাপন

এই সংস্করণে, শিক্ষাকার্য্যের সৌকর্য্যার্থে, অপেক্ষাকৃত দুরূহ অংশসমূহের সংক্ষিপ্ত ব্যাখ্যা নিম্নদেশে সন্নিবেশিত, এবং গ্রন্থ-কলেবরের অতিবিস্তৃতিদোষপরিহারার্থ মূলের শেষ কিয়দংশ পরিত্যক্ত হইল।

শ্রীঈশ্বরচন্দ্র শর্ম্মা

কলিকাতা।

১লা চৈত্র। সংবৎ ১৯২১।

ऋजुपाठम्।

द्वितीयो भागः।

राजा दशरथः पूर्व्वं कैकेय्यै द्वौ वरौ ददौ। अधुना सा रामस्य राज्याभिषेकमसहमाना एकेन वरेण रामस्य वनप्रवासन-मपरेण च स्वसुतस्य भरतस्याभिषेचनं याचितवती।

तत् श्रुत्वा दशरथस्य विलापः।

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः।
पपात सहसा भूमौ निश्चेष्टश्चाभवत्तदा॥
चिरेण नृपतिः संज्ञां प्रतिलभ्य सुदुःखितः।
कैकेयीमब्रवीत् क्रुद्धो निर्दहन्निव चक्षुषा॥
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि।
किं कृतं तव रामेण पापे (१) पापं (२) मयापि वा॥
सदा ते जननीतुल्यां वृत्तिं (३) वहति (४) राघवः।
तस्यैवं त्वमनर्थाय किं निमित्तमिहोद्यता॥

---

(१) पापे दुष्टाशये।

(२) पापम् अनिष्टम्।

(३) वृत्तिम् आचारं शुश्रूषामिति यावत्।

(४) वहति धारयति करोतीति यावत्।

त्वं मयात्मविनाशाय भवनं स्वं निवेशिता ।
अविज्ञानान्नृपसुता व्याली तीक्ष्णविषा यथा ॥
जीवलोको यदा सर्व्वो रामस्याह गुणस्तवम् ।
अपराधं कमुद्दिश्य (१) त्यक्ष्यामीष्टमहं सुतम् ॥
कौशल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम् (२) ।
जीवितं वात्मनो रामं न त्वेव पितृवत्सलम् ॥
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ।
अपश्यतस्तु मे रामं नष्टं भवति चेतनम् ॥
तिष्ठेल्लोको विना सूर्य्यं शस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥
तदलं त्यज्यतामेष निश्चयः (३) पापनिश्चये (४) ।
अपि ते चरणौ मूर्द्ध्ना स्पृशाम्येष प्रसीद मे ॥
न हि किञ्चिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधामि ते (५) ॥
ननु मे राघवस्तुल्यो भरतेन महात्मना ।
बहुशो हि स्म कैकेयि कथाः कथयसे मम ॥

---

(१) उद्दिश्य अवलम्ब्य ।

(२) श्रियं राज्यलक्ष्मीम् ।

(३) निश्चयः रामविवासनविषयः सङ्कल्पः ।

(४) पापनिश्चये दुष्टसङ्कल्पे ।

(५) न श्रद्दधामि ते तवेयं प्रार्थना यथार्थेति न विश्वसिमीति भावः ।

तस्य धर्म्मात्मनो देवि वने वासं यशस्विनः।
कथं रोचयसे भीरु नव वर्षाणि पञ्च च॥
रामो हि भरताद्भूयः (१) तव शुश्रूषते सदा।
विशेषं त्वयि तस्मात्तु भरतस्य न लक्षये॥
सत्यं दानं तपो धैर्य्यं मित्रता शौचमार्ज्जवम् (२)।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे॥
तस्मिन्नार्ज्जवसम्पन्ने देवि देवोपमे कथम्।
पापमाशंससे (३) रामे महर्षिसमतेजसि॥
मम वृद्धस्य कैकेयि गतान्तस्य (४) तपस्विनः (५)।
दीनं लालप्यमानस्य कारुण्यं कर्त्तुमर्हसि॥
पृथिव्यां सागरान्तायां यत् किञ्चिदधिगम्यते।
तत् सर्व्वं तव दास्यामि मा त्वं मे मृत्युमाविश (६)॥
इति दुःखाभिसन्तप्तं विलपन्तमचेतनम्।
प्रत्युवाचाथ कैकेयी रौद्रा (७) रौद्रतरं (८) वचः॥

---

(१) भूयः अधिकतरम्।

(२) शौचं बाह्यान्तरशुद्धिः। आर्ज्जवं वञ्चनाराहित्यम्।

(३) पापं वनवासरूपमनिष्टम् आशंससे कामयसे।

(४) गतान्तस्य प्राप्तचरमकालस्य।

(५) तपस्विनः दीनस्य शोचनीयामवस्थामापन्नस्येत्यर्थः।

(६) मृत्युं मृत्युसम्पादकं रामविवासनरूपमुत्कटमनिष्टम् आविश घटय।

(७) रौद्रा दारुणा।

(८) रौद्रतरम् अतिदारुणम्।

भवत्वधर्म्मो धर्म्मो वा सत्यं वा यदिवानृतम् ।
यत्त्वया संश्रुतं (१) मह्यं तस्य नास्ति व्यतिक्रमः ॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ।
पश्यतस्ते (२) मरिष्यामि रामो यद्यभिषिच्यते ॥
भरतेनात्मना (३) नूनं शपामि मनुजाधिप ।
यथा नान्येन तुष्येयमृते रामविवासनात् ॥
श्रुत्वा तु राजा कैकेय्या वचनं तदशोभनम् ।
नाभ्यभाषत कैकेयीं मुहूर्त्तं व्याकुलेन्द्रियः ॥
स देव्या व्यवसायञ्च (४) घोरञ्च शपथं कृतम् ।
ध्यात्वा रामेति निश्वस्य छिन्नस्तरुरिवापतत् ॥
दीर्घमुष्णञ्च निश्वस्य राजा परमदुर्म्मनाः ।
दीनयातुरया वाचा कैकेयीमिदमब्रवीत् ॥
अनर्थमिममर्थाभं (५) केन त्वमुपदेशिता (६) ।
भूतोपहतचित्तेव (७) ब्रुवती मां न लज्जसे ॥

---

(१) संश्रुतं प्रतिज्ञातम् ।

(२) पश्यतस्ते पश्यन्तं त्वामनादृत्य ।

(३) आत्मना प्राणभूतेन भरतेन शपामि तच्छपथपूर्व्वकं कथयामीत्यर्थः ।

(४) व्यवसायं रामविवासनसङ्कल्पम् ।

(५) अर्थाभम् अर्थवदाभासमानम् आपातत इष्टवत् प्रतीयमानमित्यर्थः ।

(६) उपदेशिता उपदिष्टा । स्वार्थे णिच् ।

(७) भूतोपहतचित्ता भूतावेशवशेन विभ्रान्तचित्ता ।

नृशंसे पापसङ्कल्पे क्षुद्रे दुष्कृतकारिणि।
किन्नु दुःखमलीकं वा मयि रामे च पश्यसि (१)॥
न कथञ्चिदृते रामाद्भरतो राज्यमावसेत् (२)।
रामादपि हि तं मन्ये धर्म्मतो बलवत्तरम् (३)॥
कथं द्रक्ष्यामि रामस्य वनं गच्छेति भाषिते।
मुखवर्णं विवर्णन्तु यथैवेन्दुमुपप्लुतम् (४)॥
किं मां वक्ष्यति कौशल्या राघवे वनमास्थिते।
किं न्वेनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशम्॥
सततं प्रियकामा मे प्रियपुत्त्रा प्रियंवदा।
न मया सत्कृता देवी सत्कारार्हा कृते तव॥
नहि राममहं दृष्ट्वा प्रवसन्तं महावने।
चिरं जीवितुमाशंसे रुदतीं चापि मैथिलीम्॥
अनृतैर्वत मां सान्त्वैः सान्त्वयन्ती सुदारुणे।
गीतशब्देन संरुध्य लुब्धो (५) मृगमिवावधीः॥

---

(१) नु भोः मयि रामे च किं दुःखं दुःखकरम् अलीकमप्रियं वा पश्यसि अहं रामो वा तव दुःखकरम् अप्रियं च किमपि कदाचिन्न कृतवानित्यर्थः।

(२) राज्यमावसेत् राज्ये वासं रोचयेत्।

(३) धर्म्मतो बलवत्तरम् अतिशयेन धर्म्मवन्तम्।

(४) उपप्लुतं राहुग्रस्तम्।

(५) लुब्धः व्याधः।

रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये ।
बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ॥
बालिशो (१) वत कामात्मा (२) राजा दशरथो भृशम् ।
प्रस्थापयामास वनं स्त्रीकृते (३) यः प्रियं सुतम् ॥
इति देशेषु देशेषु मामुद्दिश्य नृपाधमम् ।
नाना वाचश्चरिष्यन्ति रामे प्रव्राजिते वनम् ।
नालं (४) द्वितीयं वचनं पुत्त्रो मां प्रतिभाषितुम् ।
स वनं प्रव्रजेत्युक्तो बाढ़मित्येव वक्ष्यति ॥
यदि मे राघवः कुर्य्याद्वनं गच्छेति नोदितः ।
प्रतिकूलं प्रियं मे स्यात् (५) न तु वत्सः करिष्यति ॥
शुद्धभावो (६) हि भावं (७) मे न तु ज्ञास्यति राघवः ।
वनं पुत्त्रो व्रजेत्युक्तो नैवान्यत् प्रतिवक्ष्यति ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मास्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः ॥

---

(१) बालिशः मूढः ।

(२) कामात्मा यथेच्छाचारी ।

(३) स्त्रीकृते स्त्रीनिमित्तं कैकेय्याः प्रीतिं सम्पादयितुमित्यर्थः ।

(४) न अलं न समर्थः ।

(५) यदि राघवो मम प्रतिकूलं कुर्य्यात् विपरीतमाचरेत् ममाज्ञां न पालयेदिति यावत् तन्मे प्रियं स्यात् ।

(६) शुद्धभावः सरलाशयः अकपटहृदयः इति यावत् ।

(७) भावं अभिप्रायम् ।

हन्तानार्य्ये ममामित्रे सुखिनी भव कैकयि।
त्यजामि भरतं त्वाञ्च जीवितं चेष्टमात्मनः॥
मृते मयि गते रामे वनं पुरुषपुङ्गवे।
सेदानीं विधवा राज्यं सपुत्त्रा कारयिष्यसि (१)॥
रथैरश्वैर्गजैरेव यो याति सततं स हि।
कथं पद्भ्यां महारण्ये वत्सो मे विचरिष्यति॥
यस्य चाहारसमये सूदाः (२) कुण्डलधारिणः।
अहम्पूर्व्वाः (३) पचन्ति स्म प्रशस्तं पानभोजनम्॥
स कथं नु कषायाणि तिक्तानि कटुकानि च।
फलानि भक्षयन् नित्यं सुतो मे वर्त्तयिष्यति (४)॥
महार्हवस्त्रसंवीतो भूत्वा चिरसुखोचितः (५)।
काषायपरिधानस्तु कथं रामो भविष्यति॥
धिगस्तु योषितो नाम शठाः स्वार्थपरायणाः।
न ब्रवीमि स्त्रियः सर्व्वा भरतस्यैव मातरम्॥

---

(१) कारयिष्यसि करिष्यसि। स्वार्थे णिच्।

(२) सूदाः सूपकाराः पाचका इति यावत्।

(३) अहम्पूर्व्वाः अहं पूर्व्वं पचानि अहं पूर्व्वं पचानीत्येवं परस्परं स्पर्द्धमानाः।

(४) वर्त्तयिष्यति जीविष्यति।

(५) चिरसुखोचितः चिरसुखाभ्यस्तः अविच्छिन्नसुखेन कालमतिवाहितवानित्यर्थः।

प्रतप्य वा प्रज्वल वा प्रणश्य वा
सहस्रशो वा स्फुटितां महीं व्रज ।
न ते करिष्यामि वचः सुदारुणं
ममाहितं केकयवंशपांशुले ॥

अथ भूमौ महाराजं शयानमतथोचितम् (१) ।
पुनराकारयामास (२) क्रूरा केकयवंशजा ॥
त्वं कथ्यसे (३) महाराज सत्यवादी दृढ़व्रतः (४) ।
मम चेमं वरं कस्माद्विधारयितुमिच्छसि (५) ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ।
प्रत्युवाच परिक्रुद्धो मुहूर्त्तं विमृशन्निव ॥
मृते मयि गते रामे वनं मनुजपुङ्गवे ।
हन्तानार्य्ये ममामित्रे सकामा सुखिनी भव ॥
अपुत्त्रेण मया पुत्त्रः श्रमेण महता महान् ।
रामो लब्धो महातेजाः स कथं त्यज्यते मया ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः ।
कथं कमलपत्राक्षो मया रामो विवास्यते ॥

---

(१) अतथोचितं भूमिशयनानर्हम् ।

(२) आकारयामास आजुहाव सम्बोधयामासेत्यर्थः ।

(३) कथ्यसे श्लाघ्यसे ।

(४) दृढ़व्रतः दृढ़प्रतिज्ञः ।

(५) विधारयितुम् अपरिशोधयितुम् ।

कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम्।
अभिराममहं रामं स्थापयिष्यामि (१) दण्डकान्॥
नृशंसे पापसङ्कल्पे रामं सत्यपराक्रमम्।
किं विप्रियेण कैकेयि प्रियं योजयसे मम॥

तथा विलपतस्तस्य परिभ्रमितचेतसः।
अस्तमभ्यगमत् सूर्य्यो रजनी चाभ्यवर्त्तत॥
सा त्रियामा तदार्त्तस्य चन्द्रमण्डलमण्डिता।
राज्ञो विलपमानस्य (२) न व्यभासत (३) सर्व्वरी॥
सदैवोष्णं विनिश्वस्य वृद्धो दशरथो नृपः।
विललापार्तिदुःखार्त्तो गगनासक्तलोचनः॥
न प्रभातं त्वयेच्छामि (४) निशे नक्षत्रभूषिते।
क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः॥
अथवा गम्यतां शीघ्रं नाहमिच्छामि निर्घृणाम्।
नृशंसां कैकयीं द्रष्टुं यत्कृते व्यसनं महत्॥
एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः।
प्रसादयामास पुनः प्रेयसीं राजधर्म्मवित्॥
प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययम्।
लभतामसितापाङ्गि यशः परमवाप्स्यसि॥

---

(१) स्थापयिष्यामि प्रस्थापयिष्यामि।

(२) विलपमानस्य विलपतः। आत्मनेपदमार्षम्।

(३) न व्यभासत न शुशुभे न सुखदा बभूवेति यावत्।

(४) प्रभातं रामविवासनभयादिति भावः।

विशुद्धभावस्य हि दुष्टभावा
ताम्रेक्षणस्याश्रुमुखस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं (१) विलापं
भर्त्तुर्नृशंसा न चकार वाक्यम् ॥
ततः स राजा पुनरेव विह्वलः
प्रियामतुष्टां प्रतिकूलभाषिणीम् ।
समीक्ष्य पुत्रस्य विवासकारणं (२)
क्षितौ विसंज्ञो (३) निपपात दुःखितः ॥
पुत्रशोकार्द्दितं पापा विसंज्ञं पतितं भुवि ।
विचेष्टमानमुत्प्रेक्ष्य (४) ऐक्ष्वाकमिदमब्रवीत् ॥
पापं कृत्वेव किमिदं (५) मम संश्रुत्य संश्रवम् (६) ।
शेषे क्षितितले सन्नः(७) स्थित्यां(८) स्थातुं त्वमर्हसि(९) ॥

---

(१) करुणं दीनं शोकपूर्णमिति यावत् ।

(२) प्रियां पुत्रस्य विवासकारणं समीक्ष्येत्यन्वयः ।

(३) विसंज्ञः संज्ञारहितः अचेतन इति यावत् ।

(४) विचेष्टमानं भूमौ लुठन्तम् ।

(५) किमिदम्, अहं किं नैदमुचितमिति भावः ।

(६) संश्रवं वरं संश्रुत्य अङ्गीकृत्य ।

(७) सन्नः विषण्णः शोकाभिभूत इति यावत् ।

(८) स्थित्यां सत्यपालनरूपे सदाचारे ।

(९) मम संश्रवं संश्रुत्य पापं कृत्वेव सन्नः सन् क्षितितले शेषे किमिद-
मित्यन्वयः ।

आहुः सत्यं हि परमं धर्म्मं धर्म्मविदो जनाः ।
सत्यमाश्रित्य च मया त्वं धर्म्मं प्रति नोदितः (१)
सत्यं स्वमनुवर्त्तस्व (२) यदि धर्म्मे धृता मतिः ।
प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ॥
समयश्च (३) ममार्य्येमं यदि त्वं न करिष्यसि (४) ।
अग्रतस्ते ततो राजन् परित्यक्ष्यामि जीवितम् ॥
एवं प्रणोदितो राजा कैकेय्या निर्विंशङ्कया (५) ।
उद्भ्रान्तहृदयश्चापि (६) विवर्णवदनोऽभवत् ॥
विकृताभ्याञ्च नेत्राभ्यामपश्यन्निव भूमिपः ।
कृच्छ्राद्धैर्य्येण संस्तभ्य (७) कैकेयीमिदमब्रवीत् ॥
यस्ते मन्त्रकृतः (८) पाणिरग्नौ (९) पापे मया धृतः ।
तं त्यजामि स्वजं (१०) चैव तव पुत्त्रं सह त्वया ।

---

(१) धर्म्मं प्रति नोदितः प्रतिश्रुतवरदानरूपधर्म्मपालने प्रेरितः ।
(२) स्वे स्वकृतं सत्यं वरदानप्रतिज्ञारूपम् अनुवर्त्तस्व पालय ।
(३) समयं वरदानप्रतिज्ञाम् ।
(४) न करिष्यसि न पालयिष्यसि ।
(५) निर्व्विंशङ्कया भयशून्यया ।
(६) उद्भ्रान्तहृदयः विकलचित्तः ।
(७) संस्तभ्य निरुध्य चित्तवैकल्यमिति शेषः ।
(८) मन्त्रकृतः वैवाहिकमन्त्रेण संस्कृतः ।
(९) अग्नौ अग्निसमीपे अग्निं साक्षिणं कृत्वेत्यर्थः ।
(१०) स्वजं स्वस्माज्जातम् औरसमित्यर्थः ।

सपुत्रया त्वया नैव कर्त्तव्या सलिलक्रिया ।
व्याहन्तास्यशुभाचारे यदि रामाभिषेचनम् (१) ॥
तां तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः ।
प्रभाता शर्व्वरी सा तु चन्द्रनक्षत्रशालिनी ॥

पितुरालयमागत्य तं शोकपरीतं दृष्ट्वा कैकेयीमुखाच्च सर्व्वं
यथावदुपश्रुत्य रामस्य वनप्रस्थानाङ्गीकारः ।

स ददर्शासने रामः आसीनं पितरं शुभे ।
कैकेय्या सहितं दीनं मुखेन परिशुष्यता (२) ॥
स पितुश्चरणौ पूर्व्वमभिवाद्य विनीतवत् (३)
ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः (४) ॥
रामेत्युक्ता तु वचनं वाष्पपर्य्याकुलेक्षणः (५) ।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥
तदपूर्व्वं नरपतेर्दृष्ट्वा रूपं भयावहम् ।
रामोऽपि भयमापन्नो व्यथिताकुलमानसः ॥

---

(१) यदि रामाभिषेचनं व्याहन्तासि यदि रामाभिषेकव्याघातं करिष्यसि ।

(२) परिशुष्यता मुखेन उपलक्षितं शुष्कमुखमित्यर्थः ।

(३) विनीतवत् विनीतः विनयावनतः । स्वार्थे वतिरार्षः ।

(४) सुसमाहितः सम्यगवहितः सन् ।

(५) वाष्पपर्य्याकुलेक्षणः वाष्पवारिपरिपूर्णनयनः ।

अचिन्त्यकल्पं (१) नृपतेस्तं शोकमुपधारयन् (२)।
बभूव संरब्धतरः (३) समुद्र इव पर्व्वणि (४)॥
चिन्तयामास चतुरो रामः पितृहिते रतः।
किंस्विदद्य महाराजो न मां प्रत्यभिनन्दति (५)॥
अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति।
तस्य मामद्य संप्रेक्ष्य किमायासः (६) प्रवर्त्तते॥
अथ दाशरथिर्दीनो विलीनवदनद्युतिः (७)।
कैकेयीमभिसम्भाष्य रामो वचनमब्रवीत्॥
कच्चिन्मया नापराद्धमज्ञानात् येन मे पिता।
कुपितस्तन्ममाचक्ष्व त्वमेवैनं प्रसादय॥
अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः।
विषण्णवदनो दीनो न हि मां प्रतिभाषते॥
शारीरो मानसो वापि कच्चिदेनं न बाधते।
सन्तापो दारुणो देवि दुर्लभं हि सदा सुखम्॥

---

(१) अचिन्त्यकल्पम् अचिन्तनीयप्रकारम् अभावनीयस्वरूपमिति यावत्।

(२) उपधारयन् चिन्तयन्।

(३) संरब्धतरः अत्यन्तं क्षुभितः।

(४) पर्व्वणि पौर्णमास्याम् अमावस्यायाञ्च।

(५) अद्य महाराजो मां न प्रत्यभिनन्दति मां दृष्ट्वा न हृष्यति किंस्वित् किमिदम् अभूतपूर्व्वमेतदिति भावः।

(६) आयासः खेदः।

(७) विलीनवदनद्युतिः लुप्तमुखकान्तिः म्लानवदन इति यावत्।

एतदाचक्ष्व मे देवि तत्त्वेन परिपृच्छतः।
किन्निमित्तमपूर्व्वोऽयं विकारो मनुजाधिपे॥
एवमुक्ता तु कैकेयी राघवेण महात्मना।
उवाचेदं सुनिर्लज्जा धृष्टमात्महितं (१) वचः॥
न राजा कुपितो राम व्यसनं नास्य किञ्चन।
किञ्चिन्मनोगतं त्वस्य त्वद्भयान्नानुभाषते॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्य प्रवर्त्तते।
तदवश्यं त्वया कार्य्यं यन्ममानेन संश्रुतम्॥
एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च।
पश्चात्तु तप्यते राजा यथान्यः प्राकृतस्तथा॥
यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते (२)।
ततोऽहमभिधास्यामि नैव वक्ष्यति तत् स्वयम्॥
एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम्।
उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ॥
अहो धिङ्नार्हसे (३) देवि वक्तुं मामीदृशं वचः।
अहं हि वचनाद्राज्ञः पतेयमपि पावके।
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे॥

---

(१) धृष्टं प्रगल्भं निर्लज्जमिति यावत्। आत्महितम् आत्मनो हितकरम्।

(२) न विपत्स्यते न विनाशं प्राप्स्यति नान्यथा भविष्यतीति भावः।

(३) अर्हसे अर्हसि। आत्मनेपदमार्षम्।

तद्ब्रूहि सत्वरं देवि राज्ञो यदभिकाङ्क्षितम्।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते (१)॥
तमार्ज्जवसमायुक्तमनार्य्या सत्यवादिनम्।
उवाच रामं कैकेयी वचनं भृशदारुणम्॥
पुरा देवासुरे युद्धे पित्रा ते मम राघव।
रक्षितेन वरौ दत्तौ सशल्येन (२) महारणे॥
अथाद्य याचितो राजा भरतस्याभिषेचनम्।
गमनं दण्डकारण्ये तव चाद्यैव राघव॥
यदि सत्यप्रतिज्ञं त्वं पितरं कर्त्तुमिच्छसि।
आत्मानञ्च (३) नरश्रेष्ठ मम वाक्यमिदं शृणु॥
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च।
भरतश्चाभिषिच्येत यदेतदभिषेचनम् (४)।
त्वदर्थे विहितं राज्ञा तेन सर्व्वेण राघव (५)॥

---

(१) रामो द्विः द्विधा न भाषते रामो यद्वदति तत् करोति किञ्चिदुक्त्वा न केनापि कारणेन पुनस्तद्विरुद्धमाचरति वदति वेत्यर्थः।

(२) सशल्येन असुरशल्यवेधजनितक्षतव्यथितेन।

(३) आत्मानञ्च सत्यप्रतिज्ञं कर्त्तुमिच्छसीत्यन्वयः।

(४) अभिषेचनम् अभिषेकोपकरणम्।

(५) हे राघव त्वदर्थे यदेतदभिषेचनं विहितं तेन सर्व्वेण राज्ञा भरतोऽभिषिच्येतेत्यन्वयः।

सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः।
अभिषेकमिमं त्यक्त्वा जटाचीरधरो भव॥
भरतः कोशलपतिः प्रशास्तु वसुधामिमाम्।
नानारत्नसमाकीर्णां गजाश्वरथसङ्कुलाम्॥
एतत् कुरु नरेन्द्रस्य वचनं रघुनन्दन।
सत्येन (१) महता राम तारयस्व नरेश्वरम्॥
तदप्रियममित्रघ्नो वचनं मरणोपमम्।
श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत्॥
एवमस्तु (२) गमिष्यामि वने वस्तुमहं त्वितः।
जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन्॥
इदन्तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः।
नाभिनन्दति दुर्द्धर्षो यथापूर्व्वमरिन्दमः (३)॥
महाननुग्रहो मे स्यादाज्ञप्तस्य महात्मना।
मयि भृत्ये च पुत्त्रे च किं राज्ञो देवि गौरवम्॥
दैवतं हि प्रभुश्चैव पिता राजा गुरुश्च नः।
तस्याज्ञां शिरसादाय करिष्यामि यथात्थ माम्॥
मन्युर्न च त्वया कार्य्यो देवि ब्रूमि (४) तवाग्रतः।

---

(१) सत्येन पितृप्रतिज्ञापरिपालनेन।

(२) एवमस्तु यदुक्तं भवत्या तदेव भवतु।

(३) यथापूर्व्वं पूर्व्ववत्। अरिन्दमः शत्रुतापनः।

(४) ब्रूमि ब्रवीमि आर्षः प्रयोगः।

यास्यामि भव सुप्रीता वनं चीरजटाधरः ॥
व्यलीकमिदमेकन्तु (१) हृदयं दहते (२) मम ।
स्वयं यन्नाह मां राजा भरतस्याभिषेचनम् ॥
अहं हि सीतां राज्यञ्च प्राणानिष्टान् धनानि च ।
हृष्टो भ्रात्रे स्वयं दद्यां भरतायाप्रणोदितः ।
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रणोदितः ॥
तदाश्वासय क्षोमन्तं किं न्विदं (३) यन्महीपतिः ।
वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥
गच्छन्तु चैवानयितुं (४) दूतास्तीव्रजवैर्हयैः (५) ।
भरतं मातुलकुलादद्यैव नृपशासनात् ॥
दण्डकारण्यमेषोऽहं गच्छाम्येव हि सत्वरः ।
अविचार्य्य (६) पितुर्वाक्यात् समा (७) वस्तुं चतुर्दश ॥
अथ सा तस्य तद्वाक्यं श्रुत्वा रामस्य केकयी ।
प्रीतिप्रफुल्लनयना त्वरयामास राघवम् ॥

---

(१) व्यलीकं दुःखम् ।

(२) दहते दहति । आत्मनेपदमार्षम् ।

(३) किं न्विदं नु भो इदं किमर्थमेतदित्यर्थः ।

(४) आनयितुम् आनेतुम् । आर्ष. प्रयोगः ।

(५) तीव्रजवैः दृढ़वेगैः अतिद्रुतगामिभिरिति यावत् ।

(६) पितुरादेशोऽयमयुक्तो युक्तो वेति विचारं विनैवेति भावः ।

(७) समाः वत्सरान् ।

एवं भवतु यास्यन्ति दूतास्तीव्रजवैर्हयैः ।
भरतं मातुलकुलादिहावर्त्तयितुं (१) नराः ॥
तव त्वहं क्षमं (२) मन्ये नोत्सुकस्य (३) विलम्बनम् ।
राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥
व्रीड़ान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते ।
नैतत् किञ्चिन्नरश्रेष्ठ मन्युरेषोऽपनीयताम् ॥
यावत्त्वं न वनं यातः पुरादस्मादतित्वरन् (४) ।
पिता तावन्न ते राम स्नास्यते (५) भोक्ष्यतेऽपि वा ॥
तदप्रियमनार्य्याया वचनं दारुणोदयम् (६) ।
श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥
यत्तत्रभवतः (७) किञ्चिच्छक्यं कर्त्तुं प्रियं मया ।
प्राणानपि परित्यज्य सर्व्वथा कार्य्यमेव तत् ॥
न ह्यतो धर्मचरणं किञ्चिदस्ति महत्तरम् ।
यथा पितरि शुश्रूषा तस्य वा वचनक्रिया (८) ॥

---

(१) आवर्त्तयितुम् आनेतुम् ।

(२) क्षमं युक्तम् ।

(३) उत्सुकस्य वनं गन्तुकामस्य ।

(४) अतित्वरन् अतित्वरमाणः । परस्मैपदमार्षम् ।

(५) स्नास्यते स्नास्यति । आत्मनेपदमार्षम् ।

(६) दारुणोदयं दारुणार्थम् अतिनिष्ठुरमिति यावत् ।

(७) तत्रभवतः पूज्यस्य पितुरिति शेषः ।

(८) वचनक्रिया आज्ञासम्पादनम् ।

अनुज्ञातोऽप्यत्रभवता (१) भवत्या वचनादहम् ।
वने वत्स्यामि विजने वर्षाणीह चतुर्द्दश ॥
यावन्मातरमापृच्छे (२) सीताञ्चानुनयाम्यहम् (३) ।
ततोऽद्यैव गमिष्यामि दण्डकानां (४) महद्वनम् ॥
भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा (५) ।
यथा भवत्या कर्त्तव्यं स (६) हि धर्म्मः सनातनः ॥
रामस्य तु वचः श्रुत्वा नृपः शोकपरिप्लुतः (७) ।
वाष्पपूर्णेक्षणो दीनः प्ररुरोद महास्वनम् ॥
वन्दित्वा चरणौ रामः शोकार्त्तस्य पितुस्तदा ।
कैकेय्याश्चाप्यनार्य्याया निष्पपात (८) महाद्युतिः ॥
तं वाष्पपरिपूर्णाक्षः पृष्ठतोऽनुजगाम ह ।
लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्द्धनः ॥

---

(१) अत्रभवता पूज्येन पित्रेति शेषः ।

(२) आपृच्छे आमन्त्रयामि ।

(३) तावत् क्षमस्वेति शेषः ।

(४) दण्डकानां तन्नामकवन्भियाणाम् ।

(५) शुश्रूषेत् शुश्रूषेत । परस्मैपदमार्षम् । पितुः पितरम् कर्म्मणि षष्ठी ।

(६) स पितृशुश्रुषारूप आचारः ।

(७) शोकपरिप्लुतः शोकविह्वलः ।

(८) निष्पपात निश्चक्राम ।

गमने च मतिं चक्रे वनवासाय लक्ष्मणः ।
अनुचिन्त्य विना रामं नाहं जीवितुमुत्सहे ॥
न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् (१) ।
सर्व्वलोकातिगस्येव (२) लक्ष्यते चित्तविक्रिया ॥
प्रतिषिध्य शुभं छत्रं व्यजने च स्वलङ्कृते ।
विसर्ज्जयित्वा (३) स्वजनं रथं पौरांस्तथा जनान् ॥
धारयन् मनसा दुःखमिन्द्रियाणि निगृह्य (४) च ।
प्रविवेशात्मवान् (५) वेश्म मातुरप्रियशंसिवान् (६) ॥
तदा सर्व्वोऽप्यभिजनः (७) श्रीमतः सत्यवादिनः ।
नालक्षयत रामस्य कश्चिदाकारमानने (८) ॥

---

(१) वसुन्धराम् पृथिवीं राज्यमिति यावत् ।

(२) सर्व्वलोकातिगस्य सर्व्वलोकातिवर्त्तिनः तत्त्वज्ञानशालिन इव । तादृशो हि पुरुषो हर्षशोकादिभिर्नाभिभूयते रामोऽपि तथेति भावः ।

(३) विसर्ज्जयित्वा विसृज्य । आर्षः प्रयोगः ।

(४) इन्द्रियाणि निगृह्य इन्द्रियाणां चाञ्चल्यं निरुध्येत्यर्थः ।

(५) आत्मवान् धैर्य्यशाली ।

(६) अप्रियशंसिवान् अप्रियं शंसिष्यन् वनगमनरूपमप्रियं निवेदयितुमित्यर्थः । आर्षः प्रयोगः ।

(७) अभिजनः अभितो वर्त्तमानो जनः ।

(८) आकारं वैलक्षण्यं विकारमिति यावत् ।

उचितश्च (१) महाबाहुर्न जहौ हर्षमात्मवान् ।
शारदः समुदीर्णांशुः (२) चन्द्रस्तेज इवात्मनः ॥
वाचा मधुरया रामः सर्व्वं सम्मानयन् जनम् ।
मातुः समीपं धर्म्मात्मा प्रविवेश महायशाः ॥
तं गुणैः समतां प्राप्तः (३) भ्राता विपुलविक्रमः ।
सौमित्रिरनुवव्राज धारयन् दुःखमात्मनः ॥

वनं गन्तुं कृतनिश्चयस्य रामस्य मातरमामन्त्रयितुं
तदन्तःपुरप्रवेशः ।

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ ।
आर्त्तशब्दो महान् जज्ञे स्त्रीणामन्तःपुरे तदा ॥
रामस्तु भृशमायस्तो (४) निश्वसन्निव कुञ्जरः ।
जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥
सोऽपश्यत् पुरुषं (५) तत्र वृद्धं परमपूजितम् ।
उपविष्टं गृहद्वारि तिष्ठतश्चापरान् बहून् ॥

---

(१) उचितम् अभ्यस्तं स्वभावसिद्धमिति यावत् ।

(२) समुदीर्णांशुः प्रदीप्तकिरणः ।

(३) गुणैः समतां तुल्यतां प्राप्तः धैर्य्यादिगुणैः रामस्य सदृश इत्यर्थः ।

(४) आयस्तः प्राप्तखेदः अन्तःपुरस्त्रीणामार्त्तनादश्रवणेन दुःखित इति यावत् ।

(५) पुरुषं द्वाररक्षिणम् ।

दृष्ट्वैव तु तदा रामं ते सर्व्वे समुपस्थिताः (१)।
जयेन (२) जयतां श्रेष्ठं वर्द्धयन्ति स्म राघवम्॥
प्रविश्य प्रथमां कक्ष्यां (३) द्वितीयायां ददर्श सः।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्॥
प्रणम्य रामस्तान् वृद्धान् तृतीयायां ददर्श सः।
स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः॥
वर्द्धयित्वा (४) प्रहृष्टास्तं प्रविश्य च गृहं स्त्रियः।
न्यवेदयन्त त्वरितं राममातुः प्रियं (५) तदा॥
प्रविश्य तु ततो रामो मातुरन्तःपुरं शुभम्।
ददर्श मातरं तत्र हावयन्तीं हुताशनम् (६)॥
सा चिरादात्मजं दृष्ट्वा मातृनन्दनमागतम्।
अभिचक्राम (७) संहृष्टा किशोरं बड़वा (८) यथा॥

---

(१) समुपस्थिताः रामस्य सम्मुखमागताः।
(२) जयेन जयशब्देन विजयी भवेति वाक्येनेत्यर्थः।
(३) कक्ष्या प्रकोष्ठः। महल इति भाषा।
(४) वर्द्धयित्वा जयशब्देनेति शेषः।
(५) प्रियं रामागमनरूपम्।
(६) हुताशनं हावयन्तीम् ऋत्विग्भिरिति शेषः।
(७) अभिचक्राम अभिमुखं जगाम।
(८) बड़वा घोटकी किशोरः घोटकशिशुः।

स मातरमभिक्रान्तामुपसंगृह्य (१) राघवः।
पर्य्यष्वजत धर्म्मात्मा मात्रा चैव परन्तपः।
परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्द्धनि॥
तमुवाच दुराधर्षं (२) राघवं सुतमात्मनः।
कौशल्या पुत्रवात्सल्यादिदं प्रियहितं (३) वचः॥
वृद्धानां धर्म्मशीलानां राजर्षीणां महात्मनाम्।
प्राप्नुह्यायुश्च कीर्त्तिञ्च धर्म्मञ्चाप्युचितं कुले॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव।
अद्यैव त्वां स धर्म्मात्मा यौवराज्येऽभिषेक्ष्यति॥

दत्तमासनमालभ्य (४) विनयावनतस्ततः।
मातरं राघवः किञ्चित् प्रसार्य्याञ्जलिमब्रवीत्॥
देवि नूनं न जानीषे महद्भयमुपस्थितम्।
इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च॥
गमिष्ये (५) दण्डकारण्यं किमनेनासनेन मे।
विष्टरासनयोग्यो (६) हि कालो मे समुपस्थितः॥

---

(१) उपसंगृह्य अभिवाद्य।

(२) दुराधर्षं शत्रुभिरनभिभवनीयम्।

(३) प्रियहितं प्रियं हितं च।

(४) आलभ्य स्पृष्ट्वा न तु तत्रोपविश्येति भावः।

(५) गमिष्ये गमिष्यामि। आत्मनेपदमार्षम्।

(६) विष्टरः तपस्विनामासनं तदुपवेशनयोग्यः।

चतुर्दश हि वर्षाणि वत्स्यामि विजने वने ।
कन्दमूलफलैर्जीवन् हित्वा मुनिवदामिषम् ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्यं विवासयति तापसम् ॥
स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने ।
आसेवमानोऽरण्यानि फलमूलैश्च वर्त्तयन् ॥
सा निकृत्तेव सालस्य यष्टिः (१) परशुना वने ।
पपात सहसा देवी देवतेव दिवश्च्युता (२) ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ।
रामस्तूत्थापयामास मातरं गतचेतनाम् ॥
सा राघवमुपासीनमसुखार्त्ता (३) सुखोचिता ।
उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥
यदि वत्स न जायेथा मम शोकाय राघव ।
अद्य नैतादृशं दुःखं पश्येयमहमप्रजाः ॥
एक एव हि वन्ध्यायाः शोको भवति मानसः ।
अप्रजास्मीति सन्तापो न ह्यन्यः पुत्र विद्यते (४) ॥

---

(१) यष्टिः शाखा ।

(२) दिवः स्वर्गात् च्युता निष्पतिता ।

(३) उपासीनं समीपवर्त्तिनम् ।

(४) वन्ध्याया अप्रजा अस्मीत्येक एव मानसः शोको भवति अन्यः सन्तापो न विद्यते इत्यन्वयः । अप्रजास्मीति सन्धिरार्षः ।

सा बह्वन्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् ।
अहं श्रोष्ये (१) सपत्नीनामवराणां वरा (२) सती ॥
अतो दुःखतरं (३) किं नु प्रमदानां भविष्यति ।
मम शोको विलापश्च यादृशोऽयमनन्तकः ॥
त्वयि सन्निहितेऽप्येवमहमासं निराकृता (४) ।
किं पुनः प्रोषिते तात ध्रुवं मरणमेव हि ॥
तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरात् (५) ।
विप्रकारं (६) सपत्नीनामेवं जीर्णापि राघव ॥
अपश्यन्ती तव मुखं परिपूर्णशशिप्रभम् ।
कृपणा वर्त्तयिष्यामि कथं कृपणजीविका (७) ॥
स्थिरं नु हृदयं मन्ये ममेदं यन्न दीर्य्यते (८) ।
प्रावृषीव महानद्याः स्पृष्टं कूलं नवाम्भसा ॥

---

(१) श्रोष्ये श्रोष्यामि । आत्मनेपदमार्षम् ।

(२) वरा ज्येष्ठा अवरा कनिष्ठा ।

(३) दुःखतरम् अधिककष्टकरम् ।

(४) निराकृता अवमानिता सपत्नीभिरिति शेषः ।

(५) चिरात् चिरकालम् ।

(६) विप्रकारः तिरस्कारः सपत्नीविप्रकाररूपं महत् दुःखमित्यर्थः ।

(७) कृपणा दीना । वर्त्तयिष्यामि वृत्तिं सम्पादयिष्यामि । प्राणान् धारयिष्यामीति यावत् । कृपणजीविका शोचनीयजीवना ।

(८) तव विवासनश्रवणेनापीति शेषः ।

ममैव नूनं मरणं न विद्यते
न चावकाशोऽस्ति यमक्षये मम (१) ।
यदन्तकोऽद्यैव न मां जिहीर्षति
प्रसह्य (२) सिंहो रुदतीं मृगीमिव ॥
इदन्तु दुःखं यदनर्थकानि मे
व्रतानि दानानि च संयमाश्च हि (३) ।
तपश्च तप्तं यदपत्यकाम्यया
सुनिष्फलं बीजमिवोप्तमूषरे (४) ॥
तथा तु विलपन्तीं तां कौशल्यां राममातरम् ।
उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः ॥
न रोचते मम (५) ह्येतदार्य्ये यद्राघवो वनम् ।
त्यक्त्वा राजश्रियं गच्छेत् स्त्रिया (६) वाक्यवशं गतः ॥
विपरीतश्च (७) वृद्धश्च विषयैश्च प्रधर्षितः (८) ।

---

(१) यमक्षये यमालये । अवकाशः अवस्थितये स्थलम् ।

(२) प्रसह्य बलपूर्व्वकम् ।

(३) संयमा उपवासादिनियमाः ।

(४) ऊषरे क्षारमृत्तिकायाम् ।

(५) मम मह्यम् । सम्बन्धविवक्षया षष्ठी ।

(६) स्त्रियाः सपत्नीमातुः कैकेय्याः ।

(७) विपरीतः प्राप्तप्रकृतिवैपरीत्यः ।

(८) विषयैः प्रधर्षितः आक्रान्तः उत्कटविषयासक्तिवशात् उपहत-विवेकः इत्यर्थः ।

नृपः किमिव न ब्रूयात् कैकेय्याभिप्रणोदितः ॥
नास्यापराधं पश्यामि नापि दोषं तथाविधम् ।
येन निर्वास्यते राष्ट्राद्वनवासाय राघवः ॥
न तं पश्याम्यहं लोके परोक्षमपि यो नरः ।
अमित्रोऽपि निरस्तोऽपि(१) अस्य दोषमुदाहरेत्(२) ।
देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् ।
अवेक्षमाणः (३) को धर्म्मं त्यजेत् पुत्त्रमकारणात् ॥
तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः (४) ।
पुत्त्रः को हृदये कुर्य्याद्राजवृत्तमनुस्मरन् ॥
यावदेव न जानाति कश्चिदर्थमिमं (५) नरः ।
तावदेव (६) मया सार्द्धमात्मस्थं कुरु शासनम् ॥
मया पार्श्वे सधनुषा तव गुप्तस्य (७) राघव ।
कः समर्थोऽप्रियं कर्त्तुं कृतान्तस्येव तिष्ठतः ॥
निर्मनुष्यामिमां सर्व्वामयोध्यां मनुजर्षभ ।
करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये ॥

---

(१) निरस्तः निराकृतः निगृहीत इति यावत् ।
(२) उदाहरेत् कीर्त्तयेत् ।
(३) अवेक्षमाणः अनुरुध्यमानः अनुसरन्निति यावत् ।
(४) बाल्यं बालभावम् अविमृष्यकारित्वमिति यावत् ।
(५) इममर्थं त्वत्प्रवासनरूपं विषयम् ।
(६) तावदेव ततः पूर्व्वमेव ।
(७) गुप्तस्य रक्षितस्य ।

भरतस्याथ पक्ष्यो वा यो वास्य हितमिच्छति ।
सर्व्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते ॥
प्रोत्साहितोऽयं कैकेय्या सन्तुष्टो यदि नः पिता ।
अमित्रभूतो निःशङ्कं बध्यतां बध्यतामयम् ॥
गुरोरप्यवलिप्तस्य (१) कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य (२) कार्य्यं भवति शासनम् ॥
बलमेष किमाश्रित्य हेतुं वा कं नरोत्तम ।
दातुमिच्छति कैकेय्यै उपस्थितमिदं तव ॥
त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् (३) ।
कास्य शक्तिः श्रियं दातुं भरतायारिशासन ॥
अनुरक्तोऽस्मि वै देवि भ्रातरं प्रति तत्त्वतः ।
सत्येन धनुषा चैव शपामि तव सन्निधौ ॥
दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।
प्रविष्टं तत्र मां देवि त्वं पूर्व्वमवधारय ॥
हरामि वीर्य्याद्दुःखं ते तमः सूर्य्य इवोदितः ।
देवि त्वं पश्य मे वीर्य्यं राघवश्चैव पश्यतु ॥
हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम् ।
कृपणं (४) तं स्थितं बाल्ये वृद्धभावेन गर्हितम् ॥

---

(१) अवलिप्तस्य गर्व्वान्धस्य ।

(२) उत्पथप्रतिपन्नस्य असत्पथप्रवृत्तस्य ।

(३) अनुत्तमम् उत्कटं निरतिशयमिति यावत् ।

(४) कृपणं दीनं शोचनीयामवस्थामापन्नमित्यर्थः ।

एतत्तु वचनं श्रुत्वा लक्ष्मणस्य महात्मनः ।
उवाच रामं कौशल्या रुदती शोकविह्वला ॥
भ्रातुस्ते वचनं पुत्र लक्ष्मणस्य श्रुतं त्वया ।
यदत्रानन्तरं (१) तत् त्वं कुरुष्व यदि रोचते ॥
न चाधर्म्यं वचः श्रुत्वा सपत्न्या मम भाषितम् ।
विहाय शोकसन्तप्तां गन्तुमर्हसि मामितः ॥
धर्म्मज्ञ यदि धर्म्मिष्ठ धर्म्मं चरितुमिच्छसि ।
शुश्रूष (२) मामिहस्थस्त्वं चर धर्म्ममनुत्तमम् ॥
यथैव राजा पूज्यस्ते गौरवेण तथाह्यहम् ।
त्वां साहं नानुजानामि (३) न गन्तव्यमितो वनम् ॥
तद्वियोगान्न मे कार्य्यं जीवितेन सुखेन च ।
त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥
यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकविह्वलाम् ।
अहं प्रायमिहासिष्ये (४) न च शक्ष्यामि जीवितुम् ॥
विलपन्तीं तथा दीनां कौशल्यां जननीं ततः ।
उवाच रामो धर्म्मात्मा वचनं धर्म्मसंहितम् (५) ॥

---

(१) अनन्तरम् उत्तरकर्त्तव्यम् इतः परं यत् कर्त्तुमुचितमित्यर्थः ।

(२) शुश्रूष शुश्रूषस्व परस्मैपदमार्षम् ।

(३) नानुजानामि नानुमन्ये वनं गन्तुमिति शेषः ।

(४) प्रायम् अनशनव्रतम् आसिष्ये अवलम्बिष्ये अनशनेन प्राणान् त्यक्ष्यामीति भावः ।

(५) धर्म्मसंहितं धर्म्मानुगतम् ।

नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ।
प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥
नाहं धर्म्ममपूर्व्वं ते प्रतिकूलं प्रवर्त्तये (१) ।
पूर्व्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते (२) ॥
तदेतत्तु मया कार्य्यं नियतं वचनं पितुः ।
पितुर्हि वचनं कुर्व्वन्न कश्चिदवहीयते ॥
तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत् ।
वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्व्वधनुष्मताम् ॥
तव लक्ष्मण जानामि मयि स्नेहमनुत्तमम् ।
विक्रमश्चैव सत्त्वञ्च (३) तेजश्च सुदुरासदम् ॥
धर्म्मो हि परमो लोके धर्म्मे सत्यं प्रतिष्ठितम् ।
धर्म्मसंश्रितमेतत्तु पितुर्वचनमुत्तमम् ॥
संश्रुत्य च पितुर्वाक्यं मातुर्वा प्रियदर्शन ।
न कर्त्तव्यं वृथा (४) वीर धर्म्ममाश्रित्य तिष्ठता ॥
सोऽहं न शक्ष्यामि पितुर्नियोगमतिवर्त्तितुम् ।
पितुर्हि वचनाद्वीर कैकेय्याहं प्रणोदितः ॥

---

(१) अहं ते तव प्रतिकूलम् अप्रियम् अपूर्व्वं पूर्व्वैः अनाचरितं नूतनमिति यावत् धर्म्मम् आचारं न प्रवर्त्तये नानुतिष्ठामि ।

(२) अभिप्रेतः इष्टसाधनत्वेन अभिमतः पूर्व्वैः पूर्व्वकालीनैः साधुभिः गतः अनुसृतः अयं पितृवाक्यपालनरूपी मार्गः पन्था अनुगम्यते ।

(३) सत्त्वं बलम् ।

(४) वृथा निष्फलम् ।

तदेतां विसृजानार्य्यां (१) त्वं धर्म्माश्रितां मतिम् ।
धर्म्ममाश्रय मा तैक्ष्ण्यं (२) मद्बुद्धिरनुगम्यताम् ॥
तमेवमुक्त्वा सौहार्द्दात् भ्रातरं लक्ष्मणाग्रजः ।
उवाच भूयः कौशल्यां प्राञ्जलिः शिरसा नतः ॥
अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् ।
शापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ॥
शोकः सन्धार्य्यतां मातर्हृदये साधु मा शुच (३) ।
वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः ॥
अम्ब संहृत्य सम्भारान् (४) दुःखं हृदि निगृह्य च ।
वनवासकृता (५) बुद्धिर्मम धर्म्म्यानुवर्त्यताम् (६) ॥
इति ब्रुवति रामे तु लक्ष्मणोऽवाक्शिरा इव (७) ।
ध्यात्वा मध्यं जगामाथ सहसा दुःखहर्षयोः ॥

---

(१) अनार्य्याम् असतीं साधुविगर्हितामिति यावत् ।

(२) तैक्ष्ण्यं तीक्ष्णताम् उग्रभावमिति यावत् ।

(३) शुच शोच । आर्षः प्रयोगः ।

(४) सम्भारान् अभिषेकोपकरणानि ।

(५) वनवासकृता वनवासविषया ।

(६) अनुवर्त्यताम् अनुगम्यताम् ।

(७) इवशब्दः पादपूरणार्थः ।

ततश्च बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः ।
निशश्वास महासर्पो बिलस्थ इव रोषितः ॥
तस्य दुष्प्रतिवीक्ष्यं तत् भ्रुकुटीसहितं तदा ।
बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ॥
अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः ।
अग्राक्ष्णा (१) वीक्षमाणस्तु तिर्य्यक् भ्रातरमब्रवीत् ॥
लोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम् ।
नोत्सहे सहितुं वीर तत्र मे क्षन्तुमर्हसि ॥
येनैवमागता द्वैधं (२) तव बुद्धिर्महामते ।
सोऽपि धर्म्मो मम द्वेष्यो यत्प्रसङ्गाद्विमुह्यसि (३) ॥
कथं त्वं कर्म्मणा शक्तः कैकेयीवशवर्त्तिनः ।
करिष्यसि पितुर्वाक्यमधर्म्मिष्ठं विगर्हितम् ॥
मनसापि कथं कामं कुर्य्यास्त्वं (४) कामवृत्तयोः (५) ।
तयोरहितयोर्नित्यं शत्र्वोः पित्रभिधानयोः (६) ॥

---

(१) अग्राक्ष्णा अग्राक्षेण । आर्षः प्रयोगः ।

(२) द्वैधम् आगता संशयम् आरूढा विचलितेति यावत् ।

(३) यत्प्रसङ्गात् यदनुरोधात् यस्मिन् अवश्यकर्त्तव्यताबोधोदयादिति यावत् । विमुह्यसि हिताहितविवेकशून्योऽसि ।

(४) कामं मनोरथं कुर्य्याः पूरयेः ।

(५) कामवृत्तयोः यथेच्छाचारिणोः ।

(६) पित्रभिधानयोः नाममात्रेण मातापित्रोः । कैकयी दशरथश्च नाममात्रेण मातापितरौ कार्य्यतस्तु तौ शत्रू एवेति भावः ।

यदीयं प्रतिपत्तिस्ते दैवी चेति तयोर्मतम् (१) ।
तथाप्युपेक्षणीयं ते न मे तदपि (२) रोचते ॥
विक्लवो (३) वीर्यहीनो यः स दैवमनुवर्त्तते (४) ।
वीराः सम्भावितात्मानो (५) न दैवं पर्य्युपासते (६) ॥
लोकपालाः समस्तास्ते नाद्य रामाभिषेचनम् ।
न च कृत्स्नास्त्रयो लोका विहन्युः किं पुनः पिता ॥
यैर्विवासस्तवारण्ये मिथो राजन् समर्थितः (७) ।
अरण्ये ते निवत्स्यन्ति चतुर्दश समा (८) ध्रुवम् ॥
अहं तदाशां धक्ष्यामि पितुस्तस्याश्च या तव ।
अभिषेकविघातेन पुत्त्रराज्याय वर्त्तते ॥
न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे ।
नासिराबन्धनार्थोऽयं (९) न शरा भूषणाय वै ॥

---

(१) यदि तयोः पित्रोः इयं प्रतिपत्तिः त्वदभिषेकविघटनविषया बुद्धिः दैवी दैवकारिणीति ते तव मतम् ।

(२) तदपि तादृशं विरुद्धकारि दैवमपि ।

(३) विक्लवः बुद्धिविवेकरहितः ।

(४) अनुवर्त्तते अनुसरति अवलम्बते इति यावत् ।

(५) सम्भावितात्मानः ख्यापितनामानः वीर्य्यादिगुणमहिम्ना लब्ध-प्रतिष्ठा इति यावत् ।

(६) पर्य्युपासते सेवन्ते अवलम्बन्ते इति यावत् ।

(७) समर्थितः मन्त्रितः स्थिरीकृतो वा । (८) समाः वत्सरान् ।

(९) आबन्धनं शोभार्थं धारणम् ।

अमित्रमथनार्थाय सर्व्वमेतच्चतुष्टयम्।
असिना तीक्ष्णधारेण विद्युच्चलितवर्च्चसा (१)॥
प्रगृह्णीतेन वै शक्रं वज्रिणं न समर्थये (२)॥
खड्गनिष्पेषनिष्पिष्टैः (३) गहना दुश्चरा (४) च मे।
हस्त्यश्वरथिहस्तोरुशिरोभिर्भविता मही॥
भक्त्या रामस्य सौमित्रिं संरब्धं (५) पितरं प्रति।
श्लक्ष्णैः (६) सानुनयैर्वाक्यैः शमयामास राघवः॥
पुण्यशीलो हि धर्म्मात्मा सत्यधर्म्मपरायणः।
पार्थिवो नानृतः (७) कर्त्तुं न्याय्यो लोकगुरुर्मया॥
सत्यप्रतिज्ञं ज्ञात्वा तु पितरं धर्म्मवत्सलम्।
पुण्यां कीर्त्तिमवाप्स्यामि प्रेत्य(८) चेह च शाश्वतीम्(९)
यदि त्वस्ति मयि स्नेहो भक्तिर्वा तव लक्ष्मण।
ततो निवर्त्तयैनां त्वं पापबुद्धिं समुत्थिताम्॥

---

(१) विद्युदिव चलितं वर्च्चस्तेजो यस्य तेन।

(२) न समर्थये न गणयामि।

(३) खड्गनिष्पेषनिष्पिष्टैः खड्गप्रहारखण्डितैः।

(४) गहना निबिड़ा अतएव दुश्चरा चरितुमशक्या दुर्गम्येति यावत्।

(५) संरब्धं कुपितम्।

(६) श्लक्ष्णैः मृदुमधुरैः।

(७) अनृतः मिथ्याप्रतिज्ञः।

(८) प्रेत्य अन्यस्मिन् जन्मनि।

(९) शाश्वतीं नित्याम् अक्षयामिति यावत्।

धर्म्मात्मनः प्रभवतः (१) ख्यातस्यास्य महात्मनः ।
पितुरस्याप्रियं कर्त्तुं नेच्छामि मनसाप्यहम् ॥
यदीच्छसि प्रियं कर्त्तुं मम नित्यमभीप्सितम् ।
ततो मयि गते भक्त्या शुश्रूष्यो नृपतिस्त्वया ।
निर्व्यलीकेन (२) मनसा प्रत्यक्षं दैवतं यथा ॥
यथा यथा न तप्येयुर्वनवासं गते मयि ।
मातरश्चाविशेषेण शुश्रूष्याः सर्व्वशस्त्वया ॥
भरतश्चापि धर्म्मात्मा द्रष्टव्योऽहमिव त्वया ।
परिपाल्यश्च यत्नेन मम प्रियचिकीर्षुणा ॥
इत्युक्तवचनं रामं बभाषे लक्ष्मणस्तदा ।
अप्रकम्प्यं (३) स्थितं धर्म्मे पुरन्दरमिवानुजः (४) ॥
लोकनाथ गतिर्या ते सा ममापि भविष्यति ।
वनं वत्स्याम्यहमपि शुश्रूषानिरतस्तव ॥
त्वया त्यक्तामहमपि परित्यक्ष्ये (५) पुरीमिमाम् ।
त्वदृते न हि मे वस्तुं स्वर्गेऽपि रमते मनः ॥
यद्यस्ति मयि ते स्नेहो भक्तोऽयं प्रति मामिति ।
तन्न मामनुगच्छन्तं निवर्त्तयितुमर्हसि ॥

---

(१) प्रभवतः प्रभोः अपराधीनस्य इत्यर्थः ।
(२) निर्व्यलीकेन व्यलीकं दुःखं तद्रहितेन ।
(३) अप्रकम्प्यम् अविचलितं दृढ़प्रतिज्ञमिति यावत् ।
(४) अनुजः इन्द्रानुजो विष्णुः ।
(५) परित्यक्ष्ये परित्यक्ष्यामि । आत्मनेपदमार्षम् ।

वने निवसतस्तेऽहं नानावनविचारिणः।
आहरिष्यामि पुष्पाणि मूलानि च फलानि च॥
सहायस्ते भविष्यामि दुर्गेषु विषमेषु च (१)।
आज्ञाकरस्ते भृत्योऽहं भविष्यामि महावने॥
सर्व्वभावानुरक्तं मां न परित्यक्तुमर्हसि।
अनुगन्तुं कृतमतिं कृतघ्नं शरणागतम्॥
न निवर्त्तयितव्योऽहं सर्व्वथा रघुनन्दन।
न हि राम त्वया त्यक्तो जीवेयमिति मे मतिः (२)॥
न निवर्त्तयितुं शक्या बुद्धिरेषा (३) मम स्थिरा।
स भवाननुजानातु ममानुगमनं वने॥
सोऽनुनीतो बहुविधं लक्ष्मणेन यशस्विना।
वाढ़मित्यब्रवीद्रामो लक्ष्मणं भ्रातृवत्सलम्॥
सह यास्यामि सौमित्रे त्वयाहं गहनं वनम्।
भवान् हि परमो बन्धुः सखा (४) भक्तः प्रियश्च मे॥
एवं रामवचः श्रुत्वा लक्ष्मणानुनयं तथा।
दीर्घमुष्णञ्च निश्वस्य कौशल्या वाक्यमब्रवीत्॥
यदि धर्म्मं पुरस्कृत्य पुत्र वर्त्तितुमिच्छसि।

---

(१) प्रदेशेषु इति शेषः। दुर्गेषु दुर्गमेषु।

(२) मतिः निश्चयः सिद्धान्त इति यावत्।

(३) एषा मदनुगमनविषया।

(४) सखा सहायः सहचर इति यावत्।

ततो मे वचनं धर्म्म्यं (१) शृणु धर्म्मभृतां वर॥
त्वं हि लब्धो मया कृच्छ्रैस्तपोभिर्नियमैस्तथा।
वचनं मे त्वया कार्य्यमतः पुत्र विशेषतः॥
आशया परया (२) राम शिशुस्त्वं परिपालितः।
तत् समर्थोऽद्य मां दीनां परिरक्षितुमर्हसि॥
पश्य मामद्य पुत्र त्वं जीवितेन वियोजिताम्।
न सकामां सपत्नीं मे कैकेयीं कर्त्तुमर्हसि॥
नित्यं कालं सपत्नीभिर्भृशं विप्रकृता (३) सती।
पुत्रच्छायां समाश्रित्य भवेयं सुस्थमानसा॥
मा पुत्र वचनं कार्षीः स्त्रीविधेयस्य (४) भूपतेः।
योऽतीत्य धर्म्मं पौराणम् (५) इक्ष्वाकूणां कुलोचितम्।
त्वामतिक्रम्य भरतमभिषेक्तुमिहेच्छति॥
अपि चेयं पुरा गीता गाथा सर्व्वत्र विश्रुता।
अमुना मानवेन्द्रेण तां श्रुत्वा मे वचः कुरु॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः।
कामकारप्रवृत्तस्य (६) न कार्य्यं ब्रुवतो वचः॥

(१) धर्म्म्यं धर्म्मादनपेतं धर्म्मानुगतमिति यावत्।

(२) परया अतिमहत्या आशया समर्थः सन् मामेव रक्षिष्यतीत्येवं रूपया।

(३) विप्रकृता उद्वेजिता अवमानिता वा।

(४) स्त्रीविधेयस्य कैकेयीवशवर्त्तिनः।

(५) पौराणं चिरन्तनम्।

(६) कामकारः यथेच्छाचरणं तत्र प्रवृत्तस्य यथेच्छाचारिण इति यावत्।

पितॄन् दश च मातैका सर्व्वां वा पृथिवीं विभो ।
गुरुत्वेनाभिभवति कोऽस्ति मातृसमो गुरुः ॥
पतिता गुरवस्त्याज्या माता तु न कथञ्चन ।
गर्भधारणपोषाभ्यां ननु माता गरीयसी ॥
साहं ते पितृतो राम धर्म्मतो गौरवाधिका ।
माननीया विशेषेण यथा धर्म्मविदो विदुः ॥
अतो ममापि ते कार्य्यं शासनं गुरुवत्सल ।
अभिषिञ्चस्व धर्म्मेण राज्ये राजीवलोचन ॥
अथानुनेतुं चक्रेऽसौ मातरं यत्नमास्थितः (१) ।
प्रश्रितैर्मधुरैर्वाक्यैर्हेतुमद्भिश्च (२) राघवः ॥
मम चैव भवत्याश्च राजा प्रभवति प्रभुः ।
न प्रभुत्वमतस्तेऽस्ति मम देवि निवर्त्तने ॥
दातुमर्हसि मेऽनुज्ञां देवि धर्म्मभृतां वरे ।
वनवासाय वर्षाणि नव पञ्च च सुव्रते ॥
भर्त्ता हि दैवतं स्त्रीणां भर्त्ता चेश्वर उच्यते ।
अतस्ते शासनं भर्त्तुर्न व्याहन्तव्यमेव हि ॥
पुनरागमनं मे त्वमाशंसयितुमर्हसि ।
पतिव्रता नित्यमेव भर्त्तुराज्ञापरा सती ॥
तीर्णप्रतिज्ञ एष्यामि त्वत्प्रसादादहं पुनः ।

---

(१) आस्थितः अवलम्बितः ।

(२) प्रश्रितैः स्नेहपूर्णैः । हेतुमद्भिः युक्तियुक्तैः ।

प्रसीद देवि मा कार्षीरिदृशं शोकमण्वपि ॥
कुले जातासि विस्तीर्णे राज्ञाममिततेजसाम्।
कुलशीलगुणाचारधर्म्मज्ञासि च सुव्रते ॥
दैवतं ते गुरुश्चैव भर्त्ता देवि प्रसीद मे।
मत्स्नेहान्नार्हसे (१) मातरेतं तस्यातिवर्त्तितुम् ॥
निर्विकारं गुरोराज्ञा मया कार्य्या विशेषतः।
श्रेयो ह्येवं भवत्याश्च मम चैव भविष्यति ॥
न ते राजा किञ्चिदपि वक्तव्यो मदपेक्षया।
प्रतीपमप्रियं (२) वापि न च कार्य्यं प्रसीद मे ॥
कैकेयी वा महाभागा भरतो वा महायशाः।
अल्पमप्यप्रियं वाक्यं न वक्तव्यः प्रसीद मे ॥
भरतः सर्व्वथा देवि द्रष्टव्योऽहमिव त्वया।
कैकेयी भगिनीवच्च द्रष्टव्या स्नेहतस्त्वया ॥
पित्रा दत्तं यौवराज्यं भरतो यद्यवाप्स्यति।
तत्र दोषोऽस्ति कस्तस्य भरतस्य महात्मनः ॥
अभिसृष्टं (३) पुरा राज्ञा कैकेयी भर्तृतो वरम्।
यदि गृह्णाति कस्तस्या दोषस्तत्र ब्रवीहि (४) मे ॥
राजा च प्राक् प्रतिश्रुत्य ददात्यस्यै वरं यदि।

(१) अर्हसे अर्हसि। आत्मनेपदमार्षम्।
(२) प्रतीपं प्रतिकूलम्।
(३) अभिसृष्टं दत्तम्।
(४) ब्रवीहि ब्रूहि आर्षः प्रयोगः।

भीतोऽनृतात्तत्र दोषः को राज्ञः सत्यवादिनः ॥
श्रुतधर्म्मार्थतत्त्वो हि साधुः सद्वृत्तमास्थितः ।
सत्यज्ञः सत्यवाक् राजा न हि धर्म्माच्चलिष्यति ॥
प्रसीदानुनयामि त्वां नानुयास्यामि कथञ्चन ।
अनुजानीहि मां मातर्वनवासाय दीक्षितम् ॥
इत्युक्त्वा जननीं रामो धर्म्मार्थानुगतं वचः ।
स्थितां ध्यानपरां दीनां पुनर्वचनमब्रवीत् ॥
त्वया देवि मया चैव स्थेयं नृपतिशासने ।
राजा भर्त्ता गुरुश्चैव सर्व्वेषामीश्वरश्च नः ॥
इमानि तानि वत्स्येऽहं वर्षाणि नव पञ्च च ।
वनात् पुनरुपावृत्य स्थास्यामि तव शासने ॥
इत्युक्ता सा प्रियं पुत्त्रं वाष्पपर्य्याकुलं वचः ।
उवाचेदं सपत्नीनां मध्ये वस्तुं न मे क्षमम् ॥
नय मामपि पुत्त्र त्वं वनं वत्स्ये मृगाकुलम् ।
यदि ते गमने बुद्धिः कृता पितुरपेक्षया ॥
तां तथा ब्रुवतीं रामः पुनर्वचनमब्रवीत् ।
जीवन् देवि स्त्रिया भर्त्ता दैवतं न पुनः सुतः ।
भवत्या मम चैवाद्य राजा हि भवति प्रभुः ॥
ततो नार्हाम्यहं नेतुं त्वामितो नगराद्वनम् ।
नैवानुगन्तुं न्याय्योऽहं जीवपत्न्या (१) त्वयापि च ॥

---

(१) जीवपत्न्या जीवत्पतिकया यस्याः पतिर्जीवतीत्यर्थः ।

महात्मा चामहात्मा च पतिरेव गुरुः स्त्रियाः ।
किं पुनर्नृपतिर्देवि महात्मा दैवतं स ते ॥
भरतश्चापि धर्म्मात्मा विनीतो गुरुवत्सलः ।
असंशयं यथैवाहं पुत्त्रस्ते धर्म्मतस्तथा ॥
मत्तोऽधिकतरां पूजां भरतादप्यवाप्स्यसि ।
न हि किञ्चिदकल्याणं तस्मादामर्षयाम्यहम् (१) ॥
यथा तु मयि निष्क्रान्ते पुत्त्रशोकेन मे पिता ।
अतिमात्रं न सन्तप्येत्तथा त्वं कर्त्तुमर्हसि ॥
या धर्म्मचारिणी नारी पतिं पतिपरायणा ।
नानुवर्त्तेत धर्म्मेण स सद्भिर्न प्रशस्यते ॥
भर्त्तृव्रता भर्त्तृपरा नारी भर्त्तृपरायणा (२) ।
इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥
तस्मात् सदैव भर्त्तुस्त्वं शुश्रूषानिरता गृहे ।
स्थातुमर्हसि धर्म्मो हि सत्स्त्रीणामेष शाश्वतः ॥
गार्हस्थ्यधर्म्मरतया देवाराधनशीलया ।
भर्त्तृचित्तानुवर्त्तिन्या भर्त्ता सेव्य इह त्वया ॥
वसेह भर्त्तृसहिता ममागमनकाङ्क्षिणी ।
द्रक्ष्यसि भर्त्तृसहिता ममाभ्यागमनं पुनः ॥

---

(१) आमर्षयामि मृष्ये सम्भावयामीति यावत् । स्वार्थे णिच् ।

(२) भर्त्तृव्रता भर्त्तृसेवारता । भर्त्तृपरा भर्त्तृप्रीतिसम्पादनतत्परा । भर्त्तृपरायणा भर्त्तृमात्रशरणा ।

तं समीक्ष्य व्यवसितं (१) पितुर्निर्देशपालने।
कौशल्या बाष्पपूर्णाक्षी वचो धर्म्मिष्ठमब्रवीत्॥
अदृष्टदुःखो (२) धर्म्मात्मा सर्व्वभूतप्रियंवदः।
मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत् (३)॥
यस्य भृत्याश्च दासाश्च स्वाद्वन्नानि भुञ्जते।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम्॥
कः श्रद्दध्यादिदं श्रुत्वा कस्य वा न भवेद्भयम्।
गुणवान् दयितो राज्ञा राघवो यद्विवास्यते॥
त्वया विहीनामिह मां शोकाग्निरतुलो महान्।
प्रधक्ष्यति यथा कक्षं चित्रभानुर्हिमात्यये॥
यथा हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति।
तथा त्वामनुयास्यामि यत्र वत्स गमिष्यसि॥
इति मात्रा निगदितं वाक्यं सकरुणाक्षरम्।
श्रुत्वा रामोऽब्रवीद्वाक्यं कौशल्यां भृशदुःखिताम्॥
कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते।
भवत्या च परित्यक्तो न नूनं वर्त्तयिष्यति॥
भर्त्तुः किल परित्यागो नृशंसो नियतं स्त्रियाः।
स भवत्या न कर्त्तव्यो मनसापि विगर्हितः॥

---

(१) व्यवसितं निश्चितमतिं कृतनिश्चयमिति यावत्।

(२) अदृष्टदुःखः अननुभूतदुःखः।

(३) उञ्छेन वर्त्तयेत् क्षेत्रे स्वयं पतितानां शस्यानामाहरणम् उञ्छः तद्रूपया वृत्त्या वर्त्तयेत् जीवेत् प्राणान् धारयेदिति यावत्।

यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः।
शुश्रूषा क्रियतां तावत् स हि धर्म्मः सनातनः॥
नाहं त्वयानुगन्तव्यो भर्त्ता हि तव दैवतम्।
तमिहैव वसन्ती त्वमाराधयितुमर्हसि॥
राजा हि ते प्रभवति प्राणानां जीवितस्य च।
अनुगन्तुमतो देवि न मामर्हसि सर्व्वथा॥

इति सानुनयं वाक्यं श्रुत्वा धर्म्मार्थसंहितम् (१)।
रामेणोक्तं बभाषेऽथ कौशल्या साश्रुलोचना॥
गच्छ पुत्त्र शिवं तेऽस्तु कुरु त्वं पितृशासनम्।
स्वस्तिमन्तमरिष्टं (२) त्वां द्रक्ष्यामि पुनरागतम्॥
शुश्रूषानिरता भर्त्तुर्भविष्यामि यथात्थ माम्।
यच्चान्यदपि कर्त्तव्यं करिष्ये तत् सुखी व्रज॥

वनप्रस्थानकाले पितरमामन्त्रयितुं
रामस्य तद्भवनप्रवेशः।

दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु।
जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ॥
पदातिं सानुजं दृष्ट्वा ससीतञ्च जनास्तदा।
ऊचुर्बहुविधा वाचः शोकोपहतचेतसः॥

---

(१) धर्म्मार्थसंहितं धर्म्मार्थानुगतम्।

(२) स्वस्तिमन्तं कुशलिनम्। रिष्टम् अशुभं तद्रहितम् अरिष्टम्।

यं यान्तमनुयाति स्म चतुरङ्गबलं (१) महत्।
तमेकं सीतया सार्धमनुयाति हि लक्ष्मणः॥
ऐश्वर्य्यस्य रसज्ञः सन् कामानाञ्चाकरो (२) महान्।
नेच्छत्येवानृतं कर्त्तुं वचनं (३) धर्म्मगौरवात्॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः॥
अङ्गरागोचितां सीतां रक्तचन्दनसेविनीम्।
वर्षमुष्णञ्च शीतञ्च नेष्यत्याशु विवर्णताम्॥
अद्य नूनं दशरथः सत्त्वमाविश्य (४) भाषते।
न हि राजा प्रियं पुत्त्रं विवासयितुमर्हति॥
निर्गुणस्यापि पुत्त्रस्य कथं स्याद्विनिवासनम्।
किं पुनर्यस्य लोकोऽयं जितो वृत्तेन (५) साधुना॥
आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः (६)।
राघवं शोभयन्त्येते षड्गुणाः पुरुषर्षभम्॥

(१) गजवाजिरथपदातिभिः चतुर्भिः अवयवैः सम्पन्ना सेना।

(२) कामानां भोग्यवस्तूनाम् आकरः बहूनि भोग्यवस्तूनि यस्य सन्तीत्यर्थः।

(३) वचनं पितृवाक्यम्।

(४) सत्त्वं भूतं पिशाचादिकम् आविश्य आश्रित्य भूतावेशवशात् उपहतचेतनो भूत्वेत्यर्थः।

(५) वृत्तेन चरित्रेण।

(६) आनृशंस्यम् अहिंसा। अनुक्रोशः दया। श्रुतं शास्त्राध्ययनम्। शीलं सत्स्वभावः। दमः बाह्येन्द्रियनिग्रहः। शमः चित्तनिग्रहः।

अद्य तस्योपघातेन प्रजाः परमपीड़िताः ।
औदकानीव (१) सत्त्वानि ग्रीष्मे सलिलसंक्षयात् ॥
पीड़या पीड़ितं सर्व्वं जगदस्य जगत्पतेः ।
मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः (२) ॥
मूलं ह्येष मनुष्याणां धर्म्मसारो महाद्युतिः ।
पुष्पं फलञ्च पत्रञ्च शाखाश्चास्येतरे जनाः ॥
ते लक्ष्मण इव क्षिप्रं सपत्न्यः सहबान्धवाः ।
गच्छन्तमनुगच्छामो यत्र गच्छति राघवः ॥
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च ।
एकदुःखसुखा (३) राममनुगच्छाम धार्म्मिकम् ॥
समुद्धृतनिधानानि (४) परिध्वस्ताजिराणि (५) च ।
उपात्तधनधान्यानि (६) हृतसाराणि सर्व्वशः (७) ॥

---

(१) औदकानि उदकवासीनि जलचराणीति यावत् ।

(२) पुष्पफलोपगः पुष्पफलसहितः ।

(३) एकदुःखसुखाः समदुःखसुखाः ।

(४) निधानं भूमौ निहितं धनं तत् समुद्धृतं येभ्यः तानि उत्खात-गुप्तधनानीत्यर्थः ।

(५) परिध्वस्तम् अधिवासिभिः परित्यक्तत्वात् मार्जनादिसंस्काररहितम् अजिरम् अङ्गनं येषु तानि ।

(६) उपात्तं गृहीतं धनं धान्यं च येभ्यः तानि ।

(७) हृतः गृहीतः सारः श्रेष्ठवस्तु येभ्यः तानि ।

मूषकैः परिधावद्भिरुद्बिलैरावृतानि (१) च ।
अपेतोदकधूमानि (२) भिन्नभाजनवन्ति (३) च ।
अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम् ॥
वनं नगरमेवास्तु यत्र गच्छति राघवः ।
अस्माभिश्च परित्यक्तं पुरं सम्पद्यतां वनम् ॥
बिलानि दंष्ट्रिणः सर्व्वे सानूनि मृगपक्षिणः ।
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ॥
इत्येवं विविधा वाचो नानाजनसमीरिताः ।
शुश्राव राघवः श्रुत्वा न विचक्रेऽस्य मानसम् ॥
स नृपस्य पुनर्वेश्म कैलासशिखरप्रभम् ।
अभिचक्राम धर्म्मात्मा मत्तमातङ्गविक्रमः ॥
प्राग्द्वारमागते रामे सभार्य्ये सहलक्ष्मणे ।
वाष्पपूर्णेक्षणो दीनो विललापातुरो नृपः ॥
हन्तानार्य्ये ममामित्रे सकामा भव कैकयि ।
मृते मयि गते रामे वनं मनुजकुञ्जरे ॥
त्यजामि भरतं त्वाञ्च जीवितञ्चेदमात्मनः ।
भुङ्क्ष्वेदं विधवा राज्यं निर्घृणा (४) रहिता मया ॥

(१) उद्बिलैः अधिवासगर्त्तेभ्यो निष्क्रान्तः मनुष्यसमागमविरहेण भय-शून्यत्वादिति भावः ।

(२) पाकाद्यनुष्ठानविरहात् उदकधूमशून्यानि ।

(३) भिन्नानि भग्नानि भाजनानि स्थाल्यादिपात्राणि तद्विशिष्टानि ।

(४) निर्घृणा निष्ठुरा ।

अहं विहीनो रामेण नूनं त्यक्ष्यामि जीवितम् ।
भविष्यामि न ते पापे भूय एवं वशानुगः (१) ॥
केन मन्त्रयसे मूढ़े किं समुन्नयसे (२) शुभम् ।
मज्जीवितविनाशाय कस्यैतन्मतमीदृशम् ॥
अरण्यं भजतां रामो भरतश्चाभिषिच्यताम् ।
इति कस्य मतं पापे मोघाशस्य (३) दुरात्मनः ॥
बालो ह्यसौ कथं राज्यं भरतः पालयिष्यति ।
ज्येष्ठे तिष्ठति राज्यार्हे रामे राजीवलोचने ॥
कालरात्रिर्हि विहिता (४) नारीरूपेण केकयि ।
कथं त्वं क्षीणपुण्येन मयोढ़ा मन्दबुद्धिना ॥
स्त्रीणां (५) धिगस्त्वनार्य्याणां कृतघ्नानां विशेषतः ।
त्यजन्ति वशगान् भर्त्तॄन् या लुब्धा धनतृष्णया ॥
नृशंसे मास्तु ते लोकः परोऽपि हि सुखावहः ।
यन्मां प्रियेण पुत्त्रेण वियोजयसि दुःखितम् ॥
हा शुद्धभाव धर्म्मात्मन् विनीत गुरुवत्सल ।
मयासि पितृमान् पुत्त्र स्त्रीवश्येन हतात्मना ॥

---

(१) वशानुगः वशवर्त्ती ।

(२) समुन्नयसे सम्भावयसि ।

(३) मोघा निष्फला आशा यस्य सः तस्य हताशस्येत्यर्थः ।

(४) विधात्रेति शेषः । कालरात्रिः प्रलयरात्रिः ।

(५) स्त्रीणां स्त्रियः धिक्शब्दयोगे द्वितीयाविधानात् षष्ठीप्रयोग आर्षः ।

नृशंसोऽहमनार्य्योऽहं सर्व्वथैव धिगस्तु माम् ।
शुश्रूषुं दयितं पुत्त्रं स्त्रीजितो यस्त्यजाम्यहम् ॥
किं मां वक्ष्यति लोकोऽयं नृशंसं पापकारिणम् ।
यः पुत्त्रं स्त्रीकृते मूढ़स्त्यजाम्यनपकारिणम् (१) ॥
वशिष्ठो वामदेवश्च जावालिः काश्यपस्तथा ।
किं मां वक्ष्यन्ति ते दृष्ट्वा तथान्ये ब्रह्मवादिनः (२) ॥
विश्वामित्रादयः सिद्धास्तपोवननिवासिनः ।
पृथिव्यां पृथिवीपालाः किञ्च वक्ष्यन्ति साधवः ॥
युक्तोऽस्म्ययशसा लोके पतितश्चास्मि सर्व्वथा ।
कैकेय्यै राज्यलुब्धायै अतिसृज्य (३) वरद्वयम् ॥
हा हतोऽस्मि प्रनष्टोऽस्मि दग्धोऽस्मि व्याकुलेन्द्रियः ।
कैकेय्या वशमागत्य लुब्धायाः पापमोहितः ॥
इति राजा दशरथः पुत्त्रशोकाकुलेन्द्रियः ।
अनिन्ददात्मनात्मानं सुरां पीत्वेव वेदवित् ॥
एवं विलपतस्तस्य दुःखार्त्तस्य महीपतेः ।
उपेत्यावेदयामास सुमन्त्रो राममागतम् ॥
प्रवेश्यतां राम इति वाक्यमुक्त्वा नराधिपः ।

---

(१) अनपकारिणम् अनपराधिनम् ।

(२) ब्रह्मवादिनः वेदविदः ।

(३) अतिसृज्य दत्त्वा ।

तीव्रशोकसमाविष्टो (१) भूयो मोहमुपागतः॥
मुहूर्त्तमथ निश्चेष्टो (२) भूत्वा मोहपरायणः।
प्रतिलेभे पुनः संज्ञां सिंहासनगतो नृपः॥
लब्धसंज्ञञ्च तं भूयः सुमन्त्रः पृथिवीपतिम्।
राममेवानुशोचन्तं सूतः प्राञ्जलिरब्रवीत्॥
अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः।
ब्राह्मणेभ्यो धनं दत्त्वा सर्व्वेषां चोपजीविनाम् (३)॥
स त्वां पश्यतु भद्रं ते रामः सत्यपराक्रमः।
सर्व्वान् सुहृद आपृच्छ्य त्वां हीदानीं दिदृक्षते॥
गमिष्यति महारण्यं तं पश्य जगतीपते।
वृतं (४) राजगुणैः सर्व्वैरादित्यमिव रश्मिभिः॥
स सत्यवाक्यो धर्म्मात्मा गाम्भीर्य्ये सागरोपमः।
उवाच राजा तं सूतं सुमन्त्रानय मे सुतम्॥
स सूतो राममादाय लक्ष्मणं मैथिलीं तथा।
जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः॥
सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशाम्पतिः।
तमसंप्राप्य दुःखार्त्तः पपात भुवि मूर्च्छितः॥

---

(१) तीव्रशोकसमाविष्टः दुःसहशोकेन अभिभूतः।

(२) निश्चेष्टः स्पन्दरहितः।

(३) सर्व्वेभ्यः उपजीविभ्यः सम्प्रदाने षष्ठीप्रयोग आर्षः।

(४) वृतम् आवृतम् अलङ्कृतमिति यावत्।

तं रामोऽभ्यपतत् क्षिप्रं लक्ष्मणश्च महारथः।
विसंज्ञमिव दुःखेन सशोकं नृपतिं तथा॥
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ।
पर्य्यङ्के सीतया सार्द्धं (१) रुदन्तः समवेशयन्॥
अथ रामो मुहूर्त्तेन लब्धसंज्ञं महीपतिम्।
उवाच प्राञ्जलिर्वाष्पशोकार्णवपरिप्लुतम्॥
आपृच्छे त्वां महाराज सर्व्वेषामीश्वरोऽसि नः।
प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् (२)॥
लक्ष्मणश्चानुजानीहि सीता चान्वेतु मां वनम् (३)।
कारणैर्बहुभिस्तथ्यैर्वार्य्यमाणौ न चेच्छतः (४)॥
अनुजानीहि नः सर्व्वान् शोकमुत्सृज्य कामद।
लक्ष्मणं माञ्च सीताञ्च प्रजापतिरिवात्मजान् (५)॥

---

(१) सीतया सार्द्धम् उभौ रामलक्ष्मणौ रामः सीता लक्ष्मणश्चेति त्रय इत्यर्थः।

(२) कुशलेन मां पश्य स्नेहपूर्णेन चक्षुषा माम् अवलोकय येनाहं वनवासकाले कुशलं प्राप्नुयामिति भावः।

(३) मां वनं प्रस्थितमिति शेषः।

(४) सीतालक्ष्मणौ मया तथ्यैः यथार्थैः बहुभिः कारणैः हेतुभिर्वार्य्यमाणावपि न च इच्छतः मया विरहिताविह स्थातुं नाभिलषत इत्यर्थः।

(५) प्रजापतिः ब्रह्मा आत्मजान् सनकादीन् तपांसि चरितुमुद्यतान् यथा अनुज्ञातवान् तद्वत् त्वमपि अस्मान् अनुजानीहि।

प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः ।
उवाच राजा संप्रेक्ष्य वनवासाय राघवम् (१) ॥
अहं राघव कैकेय्या वरदानेन मोहितः ।
अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ॥
एवमुक्तो नृपतिना रामो धर्मभृतां वरः ।
प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः ॥
भव वर्षसहस्राय पृथिव्या नृपते पतिः ।
अहं त्वरण्ये वत्स्यामि (२) न मे राज्यस्य कांक्षिता ॥
नव पञ्च च वर्षाणि वनवासे विहृत्य ते ।
पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥
रुदन्नार्त्तः प्रियं पुत्रं सत्यपाशेन संयतः (४) ।
कैकेय्या नोद्यमानस्तु मिथो (५) राजा तमब्रवीत् ॥
श्रेयसे वृद्धये तात पुनरागमनाय च ।

---

(१) वनवासाय जगतीपतेः अनुज्ञां प्रतीक्षमाणं प्रार्थयमानम् अव्यग्रम् अचञ्चलं वनगमननिमित्तकविषयादिभिः अस्पृष्टमिति यावत् राघवं संप्रेक्ष्य राजा उवाचेत्यन्वयः ।

(२) बुद्धिभ्रंशविवेकक्षयादिदोषस्पृष्टतया राज्यानर्ह इति भावः ।

(३) त्वां सत्यप्रतिज्ञं कर्त्तुमिति शेषः ।

(४) संयतः बद्धः ।

(५) अद्यैव रामस्य वनगमनम् अनुमन्यस्वेति मिथो रहसि कैकेय्या नोद्यमानः ।

गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयः ॥
न हि सत्यात्मनस्तात धर्म्माभिमनसस्तव (१) ।
सन्निवर्त्तयितुं बुद्धिः शक्यते रघुनन्दन ॥
वसेह रजनीमेतां (२) पुत्त्र मा गच्छ सर्व्वथा ।
एकाहं दर्शनेनापि साधु तावच्चराम्यहम् (३) ॥
मातरं माञ्च सम्पश्यन् वसेमामद्य शर्व्वरीम् ।
तर्पितः सर्व्वकामैस्त्वं (४) श्वः काल्ये साधयिष्यसि (५) ॥
दुष्करं क्रियते पुत्त्र सर्व्वथा राघव प्रिय ।
त्वया हि मत्प्रियार्थन्तु वनमेवमुपाश्रितम् ॥
न चैतन्मे प्रियं पुत्त्र शपे सत्येन राघव ।
छन्नया(६)छलितस्त्वस्मि स्त्रिया भस्माग्निकल्पया(७) ॥

---

(१) सत्यात्मनः सत्यव्रतपरायणस्य । धर्म्माभिमनसः धर्म्ममभिमनो यस्य धर्म्माचरणनिविष्टचित्तस्येत्यर्थः ।

(२) इदानीं वनगमने अवधारिते सतीति भावः ।

(३) अहं दर्शनेन त्वद्दर्शनेन एकाहमपि तावत् साधु सम्यक् सुखेनेति यावत् चरामि तिष्ठामि ।

(४) सर्व्वकामैः तर्पितः सर्व्वैः भोग्यवस्तुभिः तृप्तिमापादितः सर्व्वान् कामान् उपभुञ्जान इत्यर्थः ।

(५) श्वः भाविनि दिने । काल्ये उषसि साधयिष्यसि गमिष्यसि ।

(६) छन्नया गूढक्रूराभिप्रायया ।

(७) भस्माग्निकल्पया भस्माच्छादितवह्नितुल्यया ।

वञ्चना या तु मे लब्धा(१)तां त्वं निस्तर्त्तुमिच्छसि(२)।
अनया वृत्तसादिन्या (३) कैकेय्याभिप्रणोदित:॥
न चैतदाश्चर्य्यतमं यत्त्वं ज्येष्ठ: सुतो मम।
अपानृतकथं (४) पुत्र पितरं कर्त्तुमिच्छसि॥
अथ रामस्तदा श्रुत्वा पितुरार्त्तस्य भाषितम्।
लक्ष्मणेन सह भ्रात्रा दीनो वचनमब्रवीत्॥
प्राप्स्यामि यानद्य गुणान् को मे श्वस्तान् प्रदास्यति।
अपक्रमणमेवात: सर्व्वकामैरहं वृणे॥
इयं सराष्ट्रा सजना धनधान्यसमाकुला।
मया विसृष्टा वसुधा भरताय प्रदीयताम्॥
यस्तु युद्धे (५) वरो दत्त: कैकेय्यै वरद त्वया।
दीयतां निखिलेनैव (६) सत्यस्त्वं (७) भव पार्थिव॥

---

(१) मे मया या वञ्चना प्रतिश्रुतवरग्रहणच्छलेन त्वद्विवासनरूपा प्रतारणा लब्धा कैकयीसकाशादिति शेष:।

(२) निस्तर्त्तुं निस्तरीतुम्। आर्ष: प्रयोग:।

(३) वृत्तसादिन्या सर्व्वज्येष्ठाभिषेकरूपकुलोचिताचारनाशिन्या।

(४) अप अपगतम् अनृतं यस्या: तादृशी कथा यस्य तम् सत्यप्रतिज्ञमित्यर्थ:।

(५) युद्धे देवासुरसंग्रामे।

(६) निखिलेन साकल्येन। भावप्रधानो निर्देश:।

(७) सत्य: सत्यप्रतिज्ञ:।

अहं निदेशं भवतो यथोक्तमनुपालयन् ।
चतुर्दश समा वत्स्ये (१) वने वनचरैः सह ॥
मा विमर्शो (२) वसुमती भरताय प्रदीयताम् ।
न हि मे काङ्क्षितं राज्यं न सुखं वा तथा प्रियम् ।
यथा निदेशं कर्त्तुं वै तवैव रघुनन्दन ॥
अपगच्छतु ते दुःखं मा भूर्वाष्पपरिप्लुतः ।
न हि क्षुभ्यति दुर्द्धर्षः समुद्रः सरिताम्पतिः ॥
नैवाहं राज्यमिच्छामि न सुखं न च मेदिनीम् ।
त्वामहं सत्यमिच्छामि नानृतं (३) पुरुषर्षभ ॥
प्रत्यक्षं तव सत्येन सुकृतेन च वै शपे ।
न च शक्यं मया तात स्थातुं क्षणमपि प्रभो ॥
स शोकं धारयस्वेमं न हि मेऽस्ति विपर्य्ययः (४) ।
अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव ।
मया चोक्तं व्रजामीति तत् सत्यमनुपालये ॥
मा चोत्कण्ठां कृथा देव वने रंस्यामहे (५) वयम् ।
प्रशान्तहरिणाकीर्णे नानाशकुनिनादिते ॥

---

(१) वत्स्यामि । आत्मनेपदमार्षम् ।

(२) मा विमर्शः विमर्शः संशयो मास्तु संशयं मा कार्षीरित्यर्थः ।

(३) अनृतं मिथ्याप्रतिज्ञम् ।

(४) विपर्य्ययः अद्यैव वनं गमिष्यामीति प्रतिज्ञाविपरीताचरणम् ।

(५) रंस्यामहे विहरिष्यामः इति यावत् ।

पिता हि दैवतं तात देवतानामपि स्मृतम् ।
तस्माद्दैवतमित्येव (१) करिष्यामि पितुर्वचः ॥
चतुर्दशसु वर्षेषु गतेषु नृपसत्तम ।
पुनर्द्रक्ष्यसि मां प्राप्तं (२) सन्तापोऽयं विमुच्यताम् ॥
येन संस्तम्भनीयोऽयं (३) सर्व्वो वाष्पाकुलो जनः ।
स त्वं पुरुषशार्दूल किमर्थं विक्रियां (४) गतः ॥
फलानि मूलानि च भक्षयन् वने
गिरींश्च पश्यन् सरितः सरांसि च ।
वनं प्रविश्यैव विचित्रपादपं
सुखी भविष्यामि तवास्तु निर्वृतिः (५) ॥
एवं स राजा व्यसनाभिपन्न-
स्तापेन (६) दुःखेन च पीड्यमानः ।
आलिङ्ग्य पुत्त्रं सुविनष्टसंज्ञो-
भूमिं गतो नैव विवेद किञ्चित् ॥

---

(१) दैवतमित्येव पिता हि परमं दैवतमित्यस्मादेव हेतोरित्यर्थः ।

(२) प्राप्तं वनवासात् प्रतिनिवृत्तम् ।

(३) संस्तम्भनीयः सान्त्वनीयः ।

(४) विक्रियां विकारं शोकाभिभवजनितं क्षोभमिति यावत् ।

(५) तव निर्वृतिः शोकशान्तिरस्तु शोकं मा कार्षीरिति भावः ।

(६) तापेन शोकेन ।

देव्यः समस्ता रुरुदुः समेता-
स्तां वै विना केकयराजपुत्रीम् ।
रुदन् सुमन्त्रोऽपि जगाम मूर्च्छां
हाहाकृतं तत्र बभूव सर्व्वम् ॥

मातामहावासात् प्रत्यागतस्य भरतस्य पितुरालये
पितरमपश्यतो मातुरालयप्रवेशः ।

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ।
जगाम भरतो द्रष्टुं मातरं मातुरालये ॥
अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ।
उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनम् ॥
स प्रविश्यैव धर्म्मात्मा स्वगृहं (१) श्रीविवर्ज्जितम् ।
भरतः प्रतिजग्राह जनन्याश्चरणौ शुभौ ॥
तं मूर्द्ध्नि समुपाघ्राय (२) परिष्वज्य यशस्विनम् ।
अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥
अद्य ते कतिचिद्रात्रयश्च्युतस्यार्य्यकवेश्मनः (३) ।
अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥

---

(१) स्वगृहं स्वमातृगृहम् ।

(२) समुपाघ्राय चुम्बयित्वा ।

(३) आर्य्यकवेश्मनः मातामहावासात् च्युतस्य चलितस्य ।

आर्य्यकस्ते नु कुशली युधाजिन्मातुलस्तव ।
प्रवासाच्च (१) सुखं पुत्र सर्व्वं मे वक्तुमर्हसि ॥
एवं पृष्टस्तु कैकेय्या प्रियं (२) पार्थिवनन्दनः ।
आचष्टे भरतः सर्व्वं मात्रे राजीवलोचनः ॥
अद्य मे सप्तमी रात्रिश्च्युतस्यार्य्यकवेश्मनः ।
अम्बायाः कुशली तातो युधाजिन्मातुलश्च मे ॥
राजवाक्यहरैर्दूतैस्त्वर्य्यमाणोऽहमागतः ।
यदहं प्रष्टुमिच्छामि तदम्बा वक्तुमर्हति ॥
शून्योऽयं शयनीयस्ते (३) पर्य्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥
राजा भवति भूयिष्ठमिहाम्बाया निवेशने ।
तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥
तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तं (४) प्रजानन्ती (५) राज्यलोभेन मोहिता ॥
या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः (६) सतां गतिः ॥

---

(१) प्रवासात् प्रवासारम्भात् इतः प्रस्थानदिवसमारभ्येति यावत् ।

(२) प्रियं प्रीतिकरं मातृकुलकुशलवृत्तान्तरूपविषयम् ।

(३) शयनीयः शयनार्हः शयने सुखद इति यावत् ।

(४) रामविवासनदशरथमरणादिकमर्थीच्याहृतान्तमिति शेषः ।

(५) घोरमप्रियं प्रियवत् प्रजानन्ती प्रियमिव मन्यमाना । प्रजानन्ती-त्यार्षः प्रयोगः ।

(६) यायजूकः यज्ञशीलः ।

तच्छ्रुत्वा भरतो वाक्यं धर्म्माभिजनवान् (१) शुचिः ।
पपात सहसा भूमौ पितृशोकबलार्द्दितः ॥
हा हतोऽस्मीति कृपणं दीनां वाचमुदीरयन् ।
निपपात महाबाहुर्बाहू विक्षिप्य वीर्य्यवान् ॥
तमार्त्तं देवसङ्काशं समीक्ष्य पतितं भुवि ।
निकृत्तमिव सालस्य स्कन्धं परशुना वने ॥
माता मातङ्गसङ्काशं चन्द्रार्कसदृशं सुतम् ।
उत्थापयित्वा (२) शोकार्त्तं वचनञ्चेदमब्रवीत् ॥
उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्त्र महायशः ।
त्वद्विधा न हि शोचन्ति सन्तः सदसि सम्मताः (३) ॥
स रुदित्वा चिरं कालं भूमौ परिविवृत्य (४) च ।
जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः (५) ॥
अभिषेक्ष्यति रामं नु राजा यज्ञं नु यक्ष्यते (६) ।
इत्यहं कृतसङ्कल्पो (७) हृष्टो यात्रामयाचिषम् (८) ॥

---

(१) धर्म्माभिजनवान् धर्म्मसम्पन्नवंशसम्भूत इत्यर्थः ।

(२) उत्थापयित्वा उत्थाप्य । आर्षः प्रयोगः ।

(३) सदसि सभायां सम्मताः पूजिताः ।

(४) परिविवृत्य लुठित्वा ।

(५) आवृतः आच्छन्नः अभिभूत इति यावत् ।

(६) यक्ष्यते करिष्यति ।

(७) इति कृतसङ्कल्प इति कृतनिश्चयः मनस्येवमवधार्य्येत्यर्थः ।

(८) यात्रां मातामहावासात् प्रस्थानम् अयाचिषम् मातामहसन्निधा-विति शेषः । अथवा यात्रामयाचिषम् प्रस्थानमकामये ।

तदिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम।
पितरं यो न पश्यामि नित्यं प्रियहिते रतम्॥
अथ केनात्यगाद्राजा व्याधिना मय्यनागते (१)।
धन्या रामादयः सर्व्वे यैः पिता संस्कृतः स्वयम्॥
न नूनं मां महाराजः प्राप्तं (२) जानाति कीर्त्तिमान्।
उपजिघ्रेत्तु मां मूर्द्ध्नि तातः सन्नम्य (३) सत्वरम्॥
क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्म्मणः (४)।
यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्ज्जति (५)॥
यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि सम्मतः।
तस्य मां (६) शीघ्रमाख्याहि रामस्याक्लिष्टकर्म्मणः॥
पिता हि भवति ज्येष्ठो धर्म्ममार्य्यस्य जानतः (७)।
तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम॥

---

(१) अत्यगात् ममार। अनागते प्रोषिते।

(२) प्राप्तम् आगतं प्रवासात् प्रतिनिवृत्तमिति यावत्।

(३) सन्नम्य नमयित्वा मूर्द्धानमिति शेषः।

(४) अक्लिष्टकर्म्मणः अश्रान्तव्यापारस्य।

(५) परिमार्ज्जति परिमार्ष्टि। आर्षः प्रयोगः।

(६) माम् आगतमिति शेषः।

(७) धर्म्मं जानतः धर्म्मज्ञस्य आर्य्यस्य सद्वृत्तसम्पन्नस्य जनस्य ज्येष्ठो भ्राता पिता हि पितेव भवति। हिरवधारणे।

आर्य्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ।
पश्चिमं साधु सन्देशमिच्छामि श्रोतुमात्मनः (१) ॥
इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ॥
रामेति राजा विलपन् हा सीते लक्ष्मणेति च ।
स महात्मा परं लोकं गतो गतिमतां (२) वरः ॥
इति मां पश्चिमां वाचं व्याजहार पिता तव ।
कालधर्म्मपरिक्षिप्तः (३) पाशैरिव महागजः ॥
सिद्धार्थास्तु (४) नरा राममागतं सह सीतया ।
लक्ष्मणञ्च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥
तच्छ्रुत्वा विषसादैवं (५) द्वितीयाप्रियशंसनात् ।
विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥
क्व चेदानीं स धर्म्मात्मा कौशल्यानन्दवर्द्धनः ।
लक्ष्मणेन सह भ्राता सीतया च समागतः ॥
तथा पृष्टा यथान्यायमाख्यातुमुपचक्रमे ।

---

(१) आत्मनः मम मामुद्दिश्येति यावत् पितुः पश्चिमम् अन्तिमं सन्देशं वाचिकं साधु सम्यक् श्रोतुमिच्छामि ।

(२) गतिमतां सद्गतिमापन्नानाम् ।

(३) कालधर्म्मः मृत्युः तत्परिक्षिप्तः तदभिभूतः ।

(४) सिद्धार्थाः सिद्धकामाः ।

(५) एवं पूर्व्वोक्तप्रकारेण ।

मातास्य युगपद्वाक्यं (१) विप्रियं प्रियशङ्कया (२)॥
स हि राजसुतः पुत्र चीरवासा महावनम्।
दण्डकान् (३) सह वैदेह्या लक्ष्मणानुचरो गतः॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया (४)।
स्वस्य वंशस्य माहात्म्यात् (५) प्रष्टुं समुपचक्रमे॥
कच्चिन्न वै परधनं हृतं रामेण कर्हिचित्।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो (६) विहिंसितः॥
कच्चिन्न परदारान् वा राजपुत्रोऽभिमन्यते।
कस्मात् स दण्डकारण्ये भ्रूणहेव विवासितः॥
एवमुक्ता तु कैकेयी भरतेन महात्मना।
उवाच वचनं हृष्टा वृथापण्डितमानिनी॥
न वै परधनं किञ्चित् हृतं रामेण कर्हिचित्।
कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः।

---

(१) युगपत् राजमरणकथनसमकालमेव।

(२) प्रियशङ्कया प्रियबोधेन रामविवासनं श्रुत्वा भरतो हृष्टो भविष्यतीत्येवं मत्वेत्यर्थः।

(३) दण्डकान् दण्डकाख्यमहावनमित्यर्थः।

(४) चारित्रशङ्कया धर्म्मभ्रंशमाशङ्क्येत्यर्थः।

(५) स्वस्य वंशस्य स्ववंशसम्भूतानामित्यर्थः। माहात्म्यम् असदाचारविरतिसदाचारनिरतिरूपम्। न हि कश्चित् ऐक्ष्वाकः कदाचित् असदाचारदूषितो भवतीति भावः।

(६) अपापः निरपराधः।

न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ॥
मया तु पुत्र श्रुत्वैव रामस्येहाभिषेचनम्।
याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥
स स्ववृत्तं समास्थाय पिता ते तत्तथाकरोत् (१)।
रामस्तु सहसौमित्रिः प्रोषितः सह सीतया ॥
तमपश्यन् प्रियं पुत्रं महीपालो महायशाः।
पुत्रशोकपरिद्यूनः (२) पञ्चत्वमुपपेदिवान् ॥
त्वया त्विदानीं धर्म्मज्ञ राजत्वमवलम्ब्यताम्।
त्वत्कृते हि मया सर्व्वमिदमेवंविधं कृतम् ॥
मा शोकं मा च सन्तापं धैर्य्यमाश्रय (३) पुत्रक।
त्वदधीना हि नगरी राज्यं चैतदनामयम् (४) ॥
श्रुत्वा तु स पितुर्वृत्तं (५) भ्रातरौ च विवासितौ।
भरतो दुःखसन्तप्त इदं वचनमब्रवीत् ॥
किन्नु कार्य्यं हतस्येह (६) मम राज्येन शोचतः।

---

(१) स्ववृत्तं स्वचरित्रं सत्यपालनरूपं समास्थाय आश्रित्य तव पिता तत् तथा अकरोत् तुभ्यं राज्यं दत्त्वा रामं विवासयामासेत्यर्थः।

(२) परिद्यूनः क्षीणः सन्तप्तो वा।

(३) आश्रयेति क्रियायाः त्रिभिः कर्म्मपदैरन्वयः।

(४) अनामयं निरुपद्रवम्।

(५) वृत्तं मृत्युम्।

(६) हतस्य अपारदुःखसागरे प्रक्षिप्तस्य।

विहीनस्याथ पिता च भ्राता पितृसमेन च ॥
दुःखे मे दुःखमकरोर्व्रणे (१) क्षारमिवाददाः।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम् ॥
कुलस्य त्वमभावाय (२) कालरात्रिरिवागता।
अङ्गारमुपगुह्यासौ (३) पिता मे नाववुद्धवान् ॥
त्वां प्राप्य हि पिता मेऽद्य सत्यसन्धो (४) महायशाः।
तीव्रदुःखाभिसन्तप्तो वृत्तो (५) दशरथो नृपः ॥
विनाशितो महाराजः पिता मे धर्म्मवत्सलः (६)।
कस्मात् प्रव्राजितो रामः कस्मादेष वनं गतः ॥
नन्वार्य्योऽपि च धर्म्मात्मा त्वयि वृत्तिमनुत्तमाम्।
वर्त्तते गुरुवृत्तिज्ञो (७) यथा मातरि वर्त्तते (८) ॥
तथा ज्येष्ठा हि मे माता कौशल्या दीर्घदर्शिनी।

---

(१) दुःखे दुखमकरोः दुःखस्य उपरि दुःखं योजयामासिथेत्यर्थः।

(२) अभावाय ध्वंसाय।

(३) अङ्गारमुपगुह्य ज्वलन्तमङ्गारमालिङ्ग्य।

(४) सन्धा प्रतिज्ञा सत्यसन्धः पूर्णप्रतिज्ञः।

(५) वृत्तः मृतः।

(६) कस्मादित्यूह्यम्।

(७) गुरुषु कर्त्तव्यां वृत्तिम् आचारं जानातीति गुरुवृत्तिज्ञः।

(८) वर्त्तते चरति करोतीत्यर्थः। धर्म्मात्मा गुरुवृत्तिज्ञः आर्य्यो यथा मातरि अनुत्तमां वृत्तिं वर्त्तते तद्वत् त्वयि अनुत्तमां वृत्तिं वर्त्तते इत्यन्वयः। स्वमातुरविशेषेण त्वयि गुरुवृत्तिं चरतीति भावः।

त्वयि धर्म्मं समास्थाय भगिन्यामिव वर्त्तते॥
तस्या पुत्त्रं महात्मानं चीरवल्कलवाससम्।
प्रस्थाप्य वनवासाय कथं पापे न शोचसि॥
अहं हि पुरुषव्याघ्रावपश्यन् रामलक्ष्मणौ।
केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे॥
अथापि मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा (१)।
सकामां(२) न करिष्यामि त्वामहं राज्यगर्द्धिनीम्(३)॥
न मे विकाङ्क्षा (४) जायेत त्यक्तुं त्वां पापनिश्चयाम्।
यदि रामस्य नावेक्षा (५) त्वयि स्यान्मातृवत् सदा॥
उत्पन्ना तु कथं बुद्धिस्तवेयं (६) पापदर्शिनी।
साधुचारित्रविभ्रष्टे पूर्व्वेषां नो विगर्हिता॥
अस्मिन् कुले हि सर्व्वेषां ज्येष्ठो राज्येऽभिषिच्यते।
अपरे भ्रातरस्तस्मिन् प्रवर्त्तन्ते समाहिताः (७)॥

---

(१) शक्तिः राज्यरक्षणसामर्थ्यम्। योगैः नीतिशास्त्रोक्तैः उपायैः तादृशोपायावलम्बनेनेति यावत्।

(२) सकामां पूर्णकामाम्।

(३) राज्यगर्द्धिनीं राज्यलोभाक्रान्तां राज्यलोभवशेन हिताहितविवेकशून्यामिति यावत्।

(४) विकाङ्क्षा इच्छाविरहः।

(५) अवेक्षा आचारः व्यवहार इति यावत्।

(६) इयं ज्येष्ठे विद्यमाने कनिष्ठस्य अभिषेकविषया।

(७) तस्मिन् समाहिताः तदधीनाः प्रवर्त्तन्ते पितरमिव तमनुजीवन्तीत्यर्थः।

न हि मन्ये नृशंसे त्वं राजधर्म्ममवेक्षसे।
गतिं च न विजानासि राजवृत्तस्य शाश्वतीम्॥
न तु कामं करिष्यामि (१) तवाहं पापनिश्चये।
यया व्यसनमारब्धं जीवितान्तकरं मम॥
एष त्विदानीमेवाहमप्रियार्थं तवानघे।
निवर्त्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम्॥
निवर्त्तयित्वा (२) रामञ्च तस्याहं दीप्ततेजसः।
दासभूतो भविष्यामि सुस्थितेनान्तरात्मना (३)॥

इत्येवमुक्त्वा भरतो महात्मा
प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् (४)।
शोकार्दितश्चापि ननाद भूयः
सिंहो यथा मन्दरकन्दरस्थः॥

तां तथा गर्हयित्वा तु मातरं भरतस्तदा।
रोषेण महताविष्टः पुनरेवाब्रवीद्वचः॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि।
परित्यक्तासि धर्म्मेण मा मृतं रुदती भव (५)॥

---

(१) कामं करिष्यामि अभिलाषं पूरयिष्यामि।

(२) निवर्त्तयित्वा निवर्त्त्य वनात् प्रत्यानीयेत्यर्थः। निवर्त्तयित्वेत्यार्षः प्रयोगः।

(३) सुस्थितेन प्रशान्तेन अन्तरात्मना मनसा।

(४) प्रियेतरैः अप्रियैः वाक्यगणैः वचनैः तां कैकेयीं तुदन् व्यथयन्।

(५) मृतं भर्त्तारम् उद्दिश्य रुदती मा भव रोदनं मा कार्षीः धर्म्मत्यागेन तव तत्र अधिकारविरहादिति भावः।

किन्नु तेऽदूषयद्रामो राजा वा भृशधार्म्मिकः ।
ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ (१) ॥
कैकेयि नरकं गच्छ मा च तातसलोकताम् (२) ।
यत्त्वया हीदृशं पापं कृतं घोरेण कर्म्मणा ॥
त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ।
अयशो जीवलोके च त्वयाहं प्रतिपादितः (३) ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥
कौशल्या च सुमित्रा च याश्चान्या मम मातरः ।
दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥
न त्वमश्वपतेः कन्या धर्म्मराजस्य धीमतः ।
राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥
यत्त्वया धार्म्मिको रामो नित्यं सत्यपरायणः ।
वनं प्रस्थापितो वीरः पितापि त्रिदिवं गतः ॥
एकपुत्त्रा तु कौशल्या विवत्सा (४) यत्त्वया कृता ।
तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥
आनाय्य च महाबाहुं कोशलेन्द्रं महाबलम् ।

---

(१) तुल्यं समकालं युगपदिति यावत् ।

(२) तातेन सलोकताम् एकलोकवासित्वम् । मा स्वर्गमाप्नुहीति भावः ।

(३) प्रतिपादितः प्रापितः ।

(४) विवत्सा पुत्त्रवियुक्ता ।

स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम्॥
न ह्यहं पापसङ्कल्पे पापे पापं त्वया कृतम्।
शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः (१)॥
सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान्।
रज्जुं बधान वा कण्ठे न हि तेऽन्यत् परायणम् (२)॥
अहमप्यवनीं (३) प्राप्ते रामे सत्यपराक्रमे।
कृतकृत्यो भविष्यामि विप्रवासितकल्मषः (४)॥
इति नाग इवारण्ये तोमराङ्कुशतोदितः।
पपात भुवि संक्रुद्धो निश्वसन्निव पन्नगः॥

अथ तत्रायये भ्रातुस्तत् श्रुत्वा लक्ष्मणानुजः।
स तमुत्थापयामास शत्रुघ्नो भरतं तदा॥
श्रुत्वा प्रव्राजितं रामं कुब्जाभेदितया तया।
कैकेय्या दुःखशोकार्त्तः शत्रुघ्नोऽथाब्रवीदिदम्॥
विद्वानार्य्योऽनृशंसश्च सर्व्वभूतहिते रतः।
स्त्रिया नाम वनं रामः कथं प्रव्राजितोऽवशः॥
बलवीर्य्यास्त्रसम्पन्नो लक्ष्मणो भ्रातृवत्सलः।
किं नाभिषिक्तवान् रामं ज्ञात्वापि पितृनिग्रहम्॥

---

(१) अश्रुकण्ठैः अश्रुजलरुद्धकण्ठैः।

(२) परायणं गतिः तव नान्या गतिरस्तीत्यर्थः।

(३) अवनीं पृथिवीं राज्यमिति यावत्।

(४) विप्रवासितकल्मषः दूरीकृतकलङ्कः।

इत्येवं भाषमाणेऽथ शत्रुघ्ने लक्ष्मणानुजे ।
प्राग्द्वारेऽभूत्तदा कुब्जा शुभ्राभरणभूषिता ।
चन्दनागुरुदिग्धाङ्गी महार्हाम्बरसंवृता ॥
समीक्ष्य तां ततो द्वाःस्थो (१) भृशं पापस्य कारिणीम् ।
गृहीत्वा त्वरितं कुब्जां शत्रुघ्नाय न्यवेदयत् ॥
यस्याः कृते गतो रामो न्यस्तदेहः (२) पिता च ते ।
सेयं पापा नृशंसा च कुरुष्वास्या यथामति ॥
तामभ्यासगतां (३) दृष्ट्वा शत्रुघ्नो मन्थरां तदा ।
चकर्ष विनिहत्योर्व्यां गले गृह्य (४) रुषान्वितः ॥
क्रोशन्त्या वदनं तस्याः पूरयामास पांशुना ।
अन्तःपुरचरान् सर्व्वान् प्रत्युवाच रुषान्वितः ॥
यन्मूलन्तु महद्दुःखं भ्रातॄणां मे तथा पितुः ।
तामिमां मन्थरां क्षुद्रां नेष्यामि यमसादनम् ॥
शत्रुघ्नेनैवमुक्ता तु सखीजनसमावृता ।
गृहीतोरःस्थले कुब्जा रुतैर्गृहमनादयत् ॥
ततश्च भृशसन्त्रस्तस्याः सर्व्वसखीजनः ।
क्रुद्धमाज्ञाय शत्रुघ्नं न्यवारयत सर्व्वशः ॥

---

(१) द्वाःस्थः द्वारपालः ।

(२) न्यस्तदेहः त्यक्तकलेवरः मृत इति यावत् ।

(३) अभ्यासगतां निकटवर्त्तिनीम् ।

(४) गले गृह्य गृहीत्वा विनिहत्य प्रहृत्य उर्व्यां भूमौ चकर्ष आकृष्टवान् । गृह्येत्यार्षः प्रयोगः ।

आमन्त्रयति (१) चैवार्त्तः कुब्जापरिजनस्तदा।
यथायमभिसंक्रुद्धो निःशेषान् नः करिष्यति॥
सानुक्रोशां शरण्याञ्च दीनार्त्तानाथबान्धवाम्।
कौशल्यां शरणं यामः सा हि नोद्य परायणम्॥
स चापि रोषताम्राक्षः शत्रुघ्नः शत्रुतापनः।
विचकर्ष भृशं कुब्जां क्रोशन्तीं पृथिवीतले॥
तामाकृष्य च शत्रुघ्नः कैकेयीसन्निधौ तदा।
कैकेयीमभिनिर्द्दिश्य प्रोवाच परुषं वचः॥
ययासत्याशुभं कर्म्म कुलक्षयकरं कृतम्।
असत्स्त्री साद्य कैकेयी कथं त्वां मोचयिष्यति॥
मूलं नस्त्वमनर्थस्य कुलक्षयकरस्य हि।
तस्मात् कुब्जेऽहमद्य त्वां नयामि यमसादनम्॥
इत्युक्त्वा भृशसंक्रुद्धः शत्रुघ्नो लक्ष्मणानुजः।
विचकर्ष बलात् कुब्जां निष्टनन्तीं (२) महीतले॥
इत्येवं परुषैर्वाक्यैः कैकेयी तेन तर्ज्जिता।
शत्रुघ्नभयसंविग्ना पुत्रं शरणमभ्यगात्॥
तं प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नं वाक्यमब्रवीत्।
अवध्या सर्व्वभूतानां प्रमदा क्षम्यतां त्वया॥

---

(१) आमन्त्रयति आमन्त्रयामास भूतसामीप्ये लट्।

(२) निष्टनन्तीम् उच्चैः शब्दायमानाम्।

हन्यामहमिमां पापां कैकेयीं स्वयमेव हि ।
यदि रामो न धर्म्मात्मा त्यजेन्मां मातृघातिनम् ॥
रोषं संयच्छ धर्म्मज्ञ हतैवेयं स्वकर्म्मणा ।
यदैवेयं परप्रेष्या कुब्जा स्त्री च विशेषतः ॥
इमामपि हतां कुब्जां यदि जानाति राघवः ।
त्वाञ्च माञ्चैव धर्म्मात्मा नाभिसम्भाषयिष्यति (१) ॥
इति तद्वचनं श्रुत्वा शत्रुघ्नो भरतेरितम् (२) ।
संयच्छन्नात्मनो रोषं तां मुमोच च मन्थराम् ॥
सा क्षिप्ता सहसोत्थाय मन्थरा भयविह्वला ।
कैकेयीमभिगम्यार्त्ता ययाचे शरणं तदा ॥
सा पादमूले कैकेय्या मन्थरा निपपात ह ।
विनिश्वसन्ती (३) दुःखार्त्ता करुणं विललाप च ॥
गर्हयन्नेव जननीं दुःखशोकाकुलेन्द्रियः ।
भरतोऽवेक्ष्य शत्रुघ्नमिदं वचनमब्रवीत् ॥
पुत्रशोकपरिद्यूनां भर्त्तृव्यसनकर्शिताम् ।
कौशल्यामेव सहितो मया पश्याद्य दुःखिताम् ॥
माता मम च शत्रुघ्न कैकेयी भर्त्तृघातिनी ।
इदं कृतवती पापं सर्व्वलोकविगर्हितम् ॥

---

(१) नाभिसम्भाषयिष्यति न सम्भाषिष्यते । स्वार्थे णिच् ।
(२) भरतेरितम् भरतेन ईरितं प्रोक्तम् ।
(३) विनिश्वसन्ती । विनिश्वसती । आर्षः प्रयोगः ।

इदन्तु मे महद्दुःखं शत्रुघ्न हृदि वर्त्तते।
किं नु वक्ष्यामि कौशल्यामतिमात्रं विलज्जितः॥
इत्युक्त्वा भरतो वाक्यं शत्रुघ्नसहितस्तदा।
रुरोदार्त्तस्वनेनोच्चैः पूरयन्निव तद्गृहम्॥
तस्य श्रुत्वार्त्तनादं तं भरतस्य महात्मनः।
कौशल्या शब्दमाज्ञाय सुमित्रामिदमब्रवीत्॥
आगतः क्रूरकर्म्मायाः (१) कैकेय्या भरतः सुतः।
तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम्॥
एवमुक्त्वा सुमित्रां तां विवर्णवदना कृशा।
प्रतस्थे भरतो यत्र वेपमाना विचेतना (२)॥
स तु राजात्मजश्चापि शत्रुघ्नसहितस्तदा।
प्रतस्थे भरतो यत्र कौशल्याया निवेशनम्॥
ततः शत्रुघ्नभरतौ कौशल्यां प्रेक्ष्य दुःखितौ।
पर्य्यष्वजेतां दुःखार्त्तां पतितां नष्टचेतनाम्॥
रुदन्तौ रुदती दुःखात् समेत्यार्य्या (३) मनस्विनी।
भरतं प्रत्युवाचेदं कौशल्या भृशदुःखिता॥
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम्।
सम्प्राप्तं तव कैकेय्या शीघ्रं क्रूरेण कर्म्मणा॥

---

(१) क्रूरकर्म्मायाः क्रूरकर्म्मणः।

(२) विचेतना विचेतनप्राया।

(३) समेत्य आलिङ्ग्य।

प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम्।
कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी॥
क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति।
दीर्घबाहुः स यत्रास्ते सुतो मे सुमहायशाः॥
अथवा स्वयमेवाद्य तत्र मां नेतुमर्हसि।
स तपस्तप्यते यत्र पुत्रो मे पितुराज्ञया॥
इदं हि तव विस्तीर्णं धनधान्यसमाचितम्।
हस्त्यश्वरथसम्पूर्णं राज्यं भोगाय वर्त्तताम्॥
एवं विलपमानां (१) तां प्राञ्जलिर्भरतस्तदा।
कौशल्यां प्रत्युवाचेदं शोकैर्बहुभिराहृताम्।
आर्य्ये कस्मादजानन्तं (२) गर्हसे मामकल्मषम् (३)।
विपुलाञ्च मम प्रीतिं स्थिरां जानासि राघवे॥
कृतशास्त्रानुगा (४) बुद्धिर्मा भूत्तस्य कदाचन।
सत्यसन्धः सतां श्रेष्ठो यस्यार्य्योऽनुमते गतः॥
कारयेत् यो महत् कर्म्म भर्त्ता भृत्यमनर्थकम् (५)।
अधर्म्मो योऽस्य सोऽस्यास्तु यस्यार्य्योऽनुमते गतः॥

(१) विलपमानां विलपन्तीम् आत्मनेपदमार्षम्।

(२) अजानन्तम् अतत्त्वं इत्तान्तमिति शेषः।

(३) अकल्मषम् अपापं निरपराधमिति यावत्।

(४) कृतशास्त्रानुगा कृतं गुरुसन्निधौ अधीतं शास्त्रं श्रुतिस्मृत्यादि तदनुगा तदनुसारिणी। वेदादिशास्त्राध्ययनं तस्य सर्व्वथा निष्फलं भवत्विति भावः।

(५) अनर्थकम् अवेतनं वेतनम् अदत्त्वेत्यर्थः।

परिपालयमानाय राज्ञे भूतानि पुत्त्रवत्।
तस्यास्तु द्रुह्यतां पापं (१) यस्यार्य्योऽनुमते गतः॥
बलिषड्भागमुद्धृत्य (२) नृपस्यारक्षितुः प्रजाः।
अधर्म्मो यस्तु सोऽस्यास्तु यस्यार्य्योऽनुमते गतः॥
जल्पतां पक्षमाश्रित्य कृत्ये विवदमानयोः।
पापं स समवाप्नोतु (३) यस्यार्य्योऽनुमते गतः॥
यद्धि पापं कृतघ्नस्य यत् पापं तस्करस्य च।
स तत् सर्व्वमवाप्नोतु यस्यार्य्योऽनुमते गतः॥
पुत्त्रैर्दारैश्च भृत्यैश्च स्वगृहे परिवारितः।
स एको मृष्टमश्नातु (४) यस्यार्य्योऽनुमते गतः॥
राजस्त्रीबालवृद्धानां बधे यत् पापमुच्यते।
भृत्यत्यागे च यत् पापं तत् पापं प्रतिपद्यताम् (५)॥
कपालपाणिः (६) पृथिवीमटतां (७) चीरसंवृतः।

---

(१) भूतानि प्रजाः पुत्त्रवत् परिपालयमानाय राज्ञे द्रुह्यतां पापं तस्यास्तु इत्यन्वयः। न्यायमार्गानुवर्त्तिराजद्रोहिणां पापमवाप्नोतु इत्यर्थः।

(२) बलिः करः षड्भागः षष्ठो भागः उद्धृत्य गृहीत्वा प्रजाभ्य आयस्य षष्ठांशरूपं करं गृहीत्वेत्यर्थः।

(३) पक्षपातिनां पापं तस्य अस्तु इत्यर्थः।

(४) मृष्टं सुसंस्कृतं स्वादु अन्नम्।

(५) यस्यार्य्योऽनुमते गतः इति पूरणीयम्। एवं परत्रापि।

(६) कपालपाणिः नरकपालधारी।

(७) अटतां अटतु। आत्मनेपदमार्षम्।

भिक्षमाणो यथोन्मत्तो यस्यार्थ्योऽनुमते गतः ॥
मद्ये प्रसक्तो भवतु स्त्रीष्वेषु च नित्यशः ।
कामक्रोधाभिभूतश्च यस्यार्थ्योऽनुमते गतः ॥
मास्य धर्म्मे मनो भूयादधर्म्मं स निषेवताम् ।
अपात्रवर्षी (१) भवतु यस्यार्थ्योऽनुमते गतः ॥
सञ्चितान्यस्य वित्तानि विविधानि सहस्रशः ।
दस्युभिर्विप्रलुप्यन्तां (२) यस्यार्थ्योऽनुमते गतः ॥
अग्निदाने हि यत् पापं यत् पापं गुरुनिन्दने ।
मित्रद्रोहे च यत् पापं तत् पापं प्रतिपद्यताम् ॥
सतां लोकात् सतां कीर्त्तिः सज्जुष्टात् (३) कर्म्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्थ्योऽनुमते गतः ॥
अपास्य मातृशुश्रूषामनर्थे (४) सोऽवतिष्ठताम् ।
दीर्घबाहुर्महावक्षा यस्यार्थ्योऽनुमते गतः ॥
बहुभृत्यो दरिद्रश्च ज्वररोगसमन्वितः ।
स यायात् (५) सततं क्लेशं यस्यार्थ्योऽनुमते गतः ॥

---

(१) अपात्रवर्षी अपात्रे दाता ।

(२) विप्रलुप्यन्ताम् अपक्रियन्ताम् ।

(३) सज्जुष्टात् साधुसेवितात् सद्भिः अनुष्ठितादिति यावत् ।

(४) अनर्थे स्त्रीवधलाद्यनर्थकरे व्यापारे अवतिष्ठतां प्रवर्त्तताम् ।

(५) यायात् प्राप्नुयात् ।

आशामाशंसमानानां (१) दीनानामूर्द्धचक्षुषाम् (२) ।
अर्थिनां वितथां कुर्य्यात् यस्यार्य्योऽनुमते गतः ॥
धर्म्मदारान् (३) परित्यज्य परदारान् निषेवताम् (४) ।
त्यक्तधर्म्मरतिर्मूढ़ो (५) यस्यार्य्योऽनुमते गतः ॥
पानीयदूषके पापं तथैव विषदायके ।
यत्तदेकः स लभतां यस्यार्य्योऽनुमते गतः ॥
तृषार्त्ते सति पानीये विप्रलम्भेन योजयन् (६) ।
यत् पापं लभते तत् स्यात् यस्यार्य्योऽनुमते गतः ॥
एवमाश्वासयन्नेव दुःखार्त्तो निपपात ह ।
विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ॥
तमेवं शपथैः कष्टैः (७) शपमानमचेतनम् (८) ।
भरतं शोकसन्तप्तं कौसल्या वाक्यमब्रवीत् ॥

---

(१) आशंसमानानां धनमाकाङ्क्षतां प्रार्थयमानानां वा ।

(२) ऊर्द्धचक्षुषां चक्षुरुन्नमय्य दातृमुखमवलोकयताम् ।

(३) धर्म्मदारान् धर्म्मपत्नीं यथाविधि परिणीतां स्त्रियमिति यावत् ।

(४) परकीयभार्य्यासु प्रसक्तो भवतु ।

(५) त्यक्तधर्म्मरतिः त्यक्ता धर्म्मे रतिः अनुरागो येन सः ।

(६) विप्रलम्भेन वञ्चनया योजयन् नास्तीत्येवमभिधाय तस्मै पानीयमप्रयच्छन्नित्यर्थः ।

(७) कष्टैः उत्कटैः श्रवणतामपि क्लेशकरैरित्यर्थः ।

(८) अचेतनं शोकावेगवशात् अचेतनप्रायम् ।

मम दुःखमिदं पुत्त्र भूयः (१) समुपजायते।
शपथैः शपमानो हि प्राणानुपरुणत्सि (२) मे॥
दिष्ट्या (३) न चलितो धर्म्मादात्मा ते शुभलक्षण।
वत्स सत्यप्रतिज्ञो (४) हि सतां लोकमवाप्स्यसि॥
इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम्।
परिष्वज्य महाबाहुं रुरोद भृशदुःखिता॥
एवं विलपमानस्य (५) दुःखार्त्तस्य महात्मनः।
मोहाच्च शोकसम्भाराद्बभूव (६) लुलितं (७) मनः॥

लालप्यमानस्य विचेतनस्य
प्रनष्टबुद्धेः पतितस्य भूमौ।
मुहुर्मुहुर्निश्वसतश्च दीर्घं
सा तस्य शोकेन जगाम रात्रिः॥

स प्राप्तो व्यसनं घोरं हीनवर्णस्वरेन्द्रियः।
भरतो न रराजार्त्तः शशीव समभिप्लुतः (८)॥

---

(१) भूयः अधिकतरम्।
(२) उपरुणत्सि व्यथयसि।
(३) दिष्ट्या भाग्येन।
(४) सत्यप्रतिज्ञः पालितप्रतिज्ञः कैकेयीसन्निधौ कृतां रामानयनप्रतिज्ञां कुर्व्वन्नित्यर्थः।
(५) विलपमानस्य विलपतः। आत्मनेपदमार्षम्।
(६) शोकसम्भारात् शोकाधिक्यात्।
(७) लुलितं क्षुभितम् आकुलमिति यावत्।
(८) समभिप्लुतः राहुग्रस्तः।

मरणेन पितुर्दीनो रामप्रव्राजनेन च।
कैकेय्याश्चार्थलुब्धाया धर्म्मत्यागेन पीड़ितः।
उवाच भरतो धीमान् शोकाकुलितमानसः॥
उत्क्रामन्त्या (१) जनन्याहं धर्म्ममार्य्यनिषेवितम् (२)।
अगाधपारे (३) महति पातितः शोकसागरे॥
मन्निमित्तं मृतो राजा रामश्चापि विवासितः।
अपापः पापतां नीतो मात्राहं पापवृत्तया (४)॥
विहीनश्चन्द्रसूर्य्याभ्यां यथा मेरुर्न शोभते।
तथा भ्रात्रा च पित्रा च शून्यं पुरमिदं ध्रुवम्॥
सोऽहं पित्रा सहाग्निं वा वनं रामेण वा सह।
प्रवेक्ष्यामि विना ताभ्यां न हि जीवितुमुत्सहे॥
आर्त्तस्य यदि रामस्य पादौ तौ शुभलक्षणौ।
संवाहये (५) वनस्थोऽहं तन्मे राज्याद्वरं भवेत्॥
शुश्रूषमाणश्चरणौ वने वन्येन जीवतः।
अहमार्य्यस्य (६) वत्स्यामि तस्यार्थायोञ्छमाहरन्॥

---

(१) उत्क्रामन्त्या उल्लङ्घमानया।

(२) आर्य्यनिषेवितं साधुभिः अवलम्बितम्।

(३) अगाधपारे दुस्तरे।

(४) अपापः शुद्धाशयः। पापतां दुष्टाशयताम्। पापवृत्तया दुष्टचरित्रया।

(५) संवाहये मर्द्दयामि।

(६) आर्य्यस्य चरणावित्यन्वयः।

नूनमार्य्यस्य पूर्णेन्दुसदृशं चारुलोचनम् ।
मम शोको मुखं वीक्ष्य न स्यात् पितृवियोगजः ॥
इति श्रुत्वा वचो धर्म्यं भरतस्य महात्मनः ।
अमात्या बन्धुवर्गाश्च दुःखादश्रूण्यवर्त्तयन् ॥
तमवाक्शिरसं भूमिं चरणाग्रेण राघवम् ।
विलिखन्तमुवाचेदं वशिष्ठो भगवानृषिः ॥
आपत्स्वमूढ़ो धृतिमान्(१) यः सम्यक् प्रतिपद्यते(२) ।
कर्म्माण्यवश्यकार्य्याणि तमाहुः पण्डितं बुधाः ॥
स त्वं धैर्य्यमुपाश्रित्य विधूय हृदयज्वरम् (३) ।
कर्त्तुमर्हस्यसम्मूढ़ आनन्तर्य्यक्रियां (४) पितुः ॥
पिता ते पुत्त्रशोकार्त्तो रामे प्रव्राजिते वनम् ।
त्वय्यनागच्छति प्राणानिष्टांस्त्यक्त्वा दिवं गतः ॥
अनाथ इव धर्म्मात्मा लोकनाथः पिता तव ।
निर्ह्रियेत (५) कथं नाम मृतस्तात त्वया विना ॥
इत्यस्माभिर्विचार्य्यैव तैलद्रोण्यां स शायितः ।
तस्य निर्हरणं (.) नाथ पितुस्तत् कर्त्तुमर्हसि ॥

---

(१) अमूढ़ः अविभ्रान्तहृदयः हिताहितविवेकसमर्थः इति यावत् । धृतिमान् धैर्य्यसम्पन्नः अक्षुभितचित्त इति यावत् ।

(२) प्रतिपद्यते अवलम्बते अनुतिष्ठतीत्यर्थः ।

(३) हृदयज्वरं चित्तवैकल्यम् ।

(४) आनन्तर्य्यक्रियाम् इतः परं कर्त्तव्यां क्रियाम् अन्त्येष्टिमिति यावत् ।

(५) निर्ह्रियेत प्रेतभूमिं नीयेत ।

(६) निर्हरणं प्रेतभूमिनयनम् ।

परिसाधय (१) मातृस्त्वं मा च शोके मनः कृथाः।
अवश्यम्भाविनो येऽर्थास्ते (२) न शोच्या भवद्विधैः॥
तस्मात् संस्तम्भयात्मानं मा भूर्भरत बालिशः (३)।
काकुत्स्थ बलवान् कालः(४) शक्यते नातिवर्त्तितुम्(५)॥
एवमुक्तो वशिष्ठेन भरतो धीमतां वरः।
वशिष्ठमभिवीक्ष्येदमुवाचार्त्ततरो वचः॥
भवत्येवं ब्रुवति मे दीर्य्यतीव मनो मुने।
लोकनाथे स्थिते रामे नाथत्वं मयि कीदृशम्॥
किन्तु तत्र नयध्वं मां यत्र राजा पिता मम।
करिष्ये तस्य संस्कारं भवद्भिः सहितो ह्यहम्॥
नेदानीं हृदयं चेन्मे स्फुटिष्यति सहस्रधा।
दर्शयन्तु भवन्तस्तं राजानं हीनजीवितम्॥
ततो वशिष्ठप्रमुखाः सर्व्वे ते नृपमन्त्रिणः।
अनयन् भरतं तत्र यत्र राज्ञः कलेवरम्॥
ततः प्रविश्य भरतः सह राजपरिग्रहैः (६)।
ददर्श पितरं प्रेतं राममातुर्निवेशने॥

---

(१) परिसाधय समाश्वासय।

(२) अर्थाः विषयाः।

(३) बालिशः मूढ़ः हिताहितविवेकविमुख इति यावत्।

(४) कालः कालगतिः दैवनिबन्धः इति यावत्।

(५) अतिवर्त्तितुम् अतिक्रमितुम् अन्यथाकर्त्तुमिति यावत्।

(६) राजपरिग्रहैः राजमहिलाभिः।

स तं गतासुं पितरं दृष्ट्वैवोपहतत्विषम् ।
हा राजन्निति विक्रुश्य पपात धरणीतले ॥
संज्ञाविहीनः संज्ञान्तु लब्ध्वा भूयः सुदुर्मनाः ।
जीवन्तमिव संप्रेक्ष्य पितरं सोऽभ्यभाषत ॥
राजन्नुत्तिष्ठ किं शेषे भरतोऽहमुपागतः ।
तवाज्ञया महाराज शत्रुघ्नसहितस्त्वरन् (१) ॥
मम मातामहस्तात कुशलं त्वा नु पृच्छति (२) ।
प्रणम्य शिरसा तद्वद्युधाजिन्मातुलश्च मे ॥
यतः कुतश्चित् (३) संप्राप्तमङ्कमाधाय मां नृप ।
त्वं हि मूर्धन्युपाघ्राय प्रतिनन्दसि भूमिप ॥
स इदानीमनुप्राप्तं कस्मान्मां नाभिभाषसे ।
नापराध्यामि ते किञ्चिदहं राजन् प्रसीद मे ॥
धन्यः स रामो येनाज्ञा कृता ते व्रजता वनम् ।
लक्ष्मणश्चापि धन्योऽसौ यो राममनु निर्गतः ॥
अधन्योऽहममुष्यस्य यस्त्वं मां प्रति मन्युमान् (४) ।
दुःखेन महताविष्टः प्राणान् संत्यक्तवानसि ॥

---

(१) त्वरन् त्वरमाणः । परस्मैपदमार्षम् ।

(२) त्वा त्वाम् ।

(३) स्थानादिति शेषः ।

(४) मन्युमान् कुपितः ।

नूनञ्च तौ न जानीतो मृत्युं ते रामलक्ष्मणौ ।
यथा हि वनमुत्सृज्य नागताविह दुःखितौ ॥
मातृदोषादप्रियस्ते यदि तावदहं नृप ।
शत्रुघ्नमपि तावत्त्वमभिभाषितुमर्हसि ॥
निर्वास्य चीरवसनं रामं लक्ष्मणमेव च ।
स्त्रीहेतोः किमसि प्राणांस्त्यक्त्वा राजन् दिवं गतः ॥
एवं विलपतस्तस्य भरतस्य महात्मनः ।
श्रुत्वा (१) नृपतिपत्न्यस्ता रुरुदुर्भृशदुःखिताः ॥
विलपन्तं तथा तन्तु भरतं शोकविह्वलम् ।
वशिष्ठो वदतां श्रेष्ठो जावालिश्चेदमूचतुः ॥
मा शोच भरत प्राज्ञ नैष शोच्यो महीपतिः ।
आनन्तर्य्यमसम्मूढः (२) कर्त्तुमस्य त्वमर्हसि ॥
नायं शोच्यस्तव पिता स्वकर्म्मजितलोकभाक् (३) ।
मृतो नायं सुता यस्य यूयं रामपुरोगमाः ।
धर्म्मात्मानो महात्मानो लोके प्रथितपौरुषाः ॥

---

(१) विलापवाक्यमिति शेषः ।

(२) आनन्तर्य्यम् मरणानन्तरकर्त्तव्यां क्रियाम् अन्त्येष्टिमिति यावत् ।

(३) स्वकर्म्मभिः स्वकृतकर्म्मबलेन जितं लब्धं लोकं भजते स्वपुण्यार्जित-स्वर्गभागीत्यर्थः ।

एवमुक्तो वशिष्ठेन भरतो धर्म्मकोविदः ।
त्यक्त्वा शोकमिदं वाक्यमुवाच वदतां वरः ॥
ब्रुवन्ति यद्भवन्तो मां तथा तद्दिति मे मतिः ।
बलवांस्तु पितृस्नेहो भृशं पीड़यतीह माम् ॥
संस्तम्भितो भवद्भिस्तु गुरुभिर्हितवादिभिः ।
त्यक्त्वा शोकं करिष्यामि पितुरस्यौर्द्ध्वदैहिकम् ॥
आनयन्तु यथादिष्टं भवन्तो नृपमन्त्रिणः ।
सांस्कारिकं पितुर्मेऽद्य सर्व्वं सम्भारमुत्तमम् (१) ॥
तस्यां रात्र्यां व्यतीतायां भरतं सूतमागधाः (२) ।
सुप्तं प्रबोधयिष्यन्तस्तुष्टुवुर्मधुरस्वराः ॥
सहसा चाभ्यहन्यन्त दुन्दुभ्यः सुमहास्वनाः ।
प्राध्माप्यन्त सुघोषाश्च शङ्खवेणुगणाः पृथक् ॥
स तूर्य्यघोषः सुमहान् पूरयन्निव तां पुरीम् ।
बोधयामास भरतं शोकव्याकुलमानसम् ॥
प्रतिषिध्याथ भरतस्तं प्रबोधकनिस्वनम् ।
नाहं राजेति चाप्युक्त्वा ततः शत्रुघ्नमब्रवीत् ॥

---

(१) सांस्कारिकं सम्भारं संस्कारः श्रौर्द्ध्वदैहिकं कर्म्म तदुपयोगिनं सांस्कारिकं सम्भारम् उपकरणम् श्रौर्द्ध्वदैहिकोपयोगिद्रव्यजातमित्यर्थः ।

(२) सूतमागधाः सूताः मागधाश्च ते च राज्ञां स्तुतिपाठकाः ।

पश्य शत्रुघ्न कैकेय्या कुर्व्वंत्या लोकगर्हितम्।
अयशः पातितं मूर्ध्नि ममासह्यमनागसः (१)॥
राजधर्म्मानुगा राज्ञः पितुर्मे तद्विनाकृता (२)।
परिभ्रमति राजश्रीर्विकर्णा (३) नौरिवाम्भसि॥
इत्येवं भरतं तत्र विलपन्तं पुनः पुनः।
दृष्ट्वा प्ररुरुदुः सर्व्वाः शोकार्त्ता नृपयोषितः॥
भरतेन ततः सार्द्धं वशिष्ठो वेदवित्तमः।
प्रविवेश तदा राज्ञः सभां मन्त्रयितुं हितम्॥
तत्रासने रत्नचित्रे (४) स्पर्द्ध्यास्तरणसंवृते (५)।
उपविश्य ततः सर्व्वानानयामास मन्त्रिणः॥
जनौघः सुमहांस्तत्र समुपायात् समन्ततः।
सभायां भरतं द्रष्टुं शत्रुघ्नसहितं तदा॥
ततो हलहलाशब्दः सुमहानभवत्तदा।
कौतूहलाज्जनौघस्य सभां प्रत्यभिधावतः॥

---

(१) अनागसः निरपराधस्य।

(२) तद्विनाकृता पित्रा विहीना।

(३) नावां गतिनियामको दण्डविशेषः कर्णः तेन विहीना विकर्णा।

(४) रत्नचित्रे रत्नालङ्कृते।

(५) स्पर्द्ध्येन महामूल्येन आस्तरणेन आच्छादनपटेन संवृते आच्छादिते।

तत्राथ भरतं दृष्ट्वा सभायां सपुरोहितम् ।
अभ्यनन्दन् प्रकृतयो यथा दशरथं तथा ॥
समावृत्ते (१) जने तस्मिन्नुदिते च दिवाकरे ।
वशिष्ठस्तमुवाचेदं भरतं तांश्च मन्त्रिणः ॥
उत्तिष्ठ भरत क्षिप्रं मा भूत् कालात्ययः (२) प्रभो ।
पितुः कुरु यथान्यायं संस्कारं भूरिदक्षिणम् ॥
सज्जिता शिविका चेयं पितुस्ते रत्नभूषिता ।
अत्रैनं शिविकायां त्वं संवेशय नराधिपम् ।
शिविकागतमुत्क्षिप्य नयैनं बहिराशु च ॥
एवमुक्तो वशिष्ठेन भरतः प्रत्युवाच तम् ।
वशिष्ठं वदतां श्रेष्ठं पितुर्बहुमतं गुरुम् ॥
यदाज्ञापयसे राज्ञः करवाणि तदास्थितः (३) ।
दैवतं ह्यसि मान्यश्च गुरोश्चापि गुरुर्मम ॥
वाक्येन तेन तस्याथ भरतस्य महात्मनः ।
आजगाम परं हर्षं वशिष्ठो द्विजसत्तमः ॥
शोकवेगमसह्यं तं धारयन् भरतस्ततः ।
कलेवरं भूमिपतेः स तदा समुदैक्षत (४) ॥

---

(१) समावृत्ते भरतम् अभिनन्द्य प्रतिनिवृत्ते ।
(२) कालात्ययः कालातिपातः ।
(३) आस्थितः अवस्थितः ।
(४) समुदैक्षत अवलोकयामास ।

न चाशक्नोत् स शोकस्य वेगं धारयितुं तदा ।
महार्णवस्यापततस्तोयवेगमिवोद्धतम् ॥
तदार्त्तिमान् (१) वेपमानस्तत्तत् स विलपन् बहु ।
शत्रुघ्नसहितः क्षिप्रं शिविकामनयन्नृपम् ॥
शिविकास्थं स राजानमलङ्कृत्य विधानतः ।
वाससा च महार्हेण समाच्छाद्य सुसंहतम् ॥
अवकीर्य्य च माल्येन दिव्यधूपावधूपितम् ।
गन्धचूर्णैः सुरभिभिः परिकीर्य्य च सर्व्वशः ॥
उवाहोत्क्षिप्य शिविकां शत्रुघ्नसहितस्ततः ।
हा राजन् क्वासि गन्तेति रुदन्नार्त्तः पुनः पुनः ॥
अग्रतः प्रययुस्तस्य सत्कर्म्मस्तुतिभिर्नृपम् ।
अभिष्टुवन्तो मधुरं सूतमागधवन्दिनः (२) ॥
तस्मिन् निर्हरणे राज्ञः करुणस्तु महांस्तदा ।
आर्त्तनादोऽभवत् स्त्रीणां यथास्य मरणे तथा ॥
ततः पौरजनः सर्व्वः सस्त्रीवृद्धकुमारकः ।
अनु राजशरीरं (३) तन्निर्य्ययौ नगराद्बहिः ॥

---

(१) आर्त्तिः पीड़ा तद्वान् व्यथित इत्यर्थः ।

(२) सूतमागधवन्दिनः सूताः मागधाः वन्दिनश्च । सर्व्व एवैते राज्ञां स्तुतिपाठकाः ।

(३) अनु राजशरीरं शिविकया नीयमानस्य राजशरीरस्य पश्चात् ।

तथा भरतशत्रुघ्नौ शिबिकां परिगृह्य तौ ।
शोकदुःखसमाविष्टौ रुदन्तावनुजग्मतुः ॥
कौशल्या च सुमित्रा च कैकेयी च तथापराः ।
रुदत्यः शोचमानाश्च (१) कुरर्य्य इव कातराः ।
अनुजग्मुः शरीरं तद्राज्ञो राजीवलोचनाः ॥
अथास्य सरयूतीरे विविक्ते मृदुशाद्वले (२) ।
चन्दनागुरुकाष्ठैस्ते राज्ञश्चक्रुश्चितां तदा ॥
तस्यां चितायां नृपतेः शरीरं तत् सुहृज्जनः ।
अशाययत् समुत्क्षिप्य शोकव्याकुलचेतनः ।
चितां प्रज्वालयाञ्चक्रे भरतः सह बन्धुभिः ॥
प्रजज्वाल ततो वह्निः सहसैव समेधितः (३) ।
महार्च्चिष्मान् (४) दहन् राज्ञश्चितारूढं कलेवरम् ॥
विधिवत् संस्कृतो राजा गुरुभिर्वेदपारगैः ।
जगाम परमं स्थानं यज्वनां पुण्यकर्म्मणाम् ॥
अवकीर्य्य च माल्येन चितां तामपसव्यतः (५) ।
प्रणेमे स पितुः पादौ निपत्य धरणीतले ॥

---

(१) शोचमानाः शोचन्त्यः आत्मनेपदमार्षम् ।

(२) विविक्ते विजने । मृदुशाद्वले कोमलहरिततृणशोभिते ।

(३) समेधितः उद्दीपितः ।

(४) महार्च्चिष्मान् दीर्घशिखायुक्तः ।

(५) अपसव्यतः वामावर्त्तेन ।

तमार्त्तरूपं पतितं विलपन्तमचेतनम्।
उत्थापयामास बलात् परिगृह्य सुहृज्जनः॥
अवेक्ष्य स पितुर्दीप्तं सर्व्वगात्रेषु पावकम्।
विललापातिकरुणं भरतः शोकविह्वलः॥
यस्या गतिरनाथायाः पुत्त्रः प्रव्राजितस्त्वया।
तामम्बां तात कौशल्यां किमर्थं नाभिभाषसे॥
एवमाद्यतिदुःखार्त्तो विलपन्नेव राघवः।
विसंज्ञकल्पो न्यपतच्छोचन् पितरमात्मनः॥
उन्मत्त इव विप्रेक्ष्य विललाप निपत्य सः।
गुणसंकीर्त्तनं कुर्व्वन् पितुर्व्वै पितृवत्सलः॥
सुकुमारश्च बालश्च सततं लालितं त्वया।
क्व तात भरतं हित्वा विलपन्तं गमिष्यसि॥
भोज्याभरणपानैस्त्वं वासोभिश्च पृथग्विधैः (१)।
संवर्द्धयसि नः सर्व्वांस्त्वत्तः कोऽद्य करिष्यति॥
त्वयि राजन् गते स्वर्गं रामे चारण्यमाश्रिते।
न जीवितुं व्यवस्यामि (२) प्रवेक्ष्यामि हुताशनम्॥
एवमादि तयोः श्रुत्वा भ्रात्रोर्विलपितं तदा।
सर्व्वः परिजनो भूयो भृशमार्त्ततरोऽभवत्॥

---

(१) पृथग्विधैः बहुविधैः।

(२) व्यवस्यामि उत्सहे इच्छामीति यावत्।

ततः शोकपरिश्रान्तौ शत्रुघ्नभरतावुभौ ।
विलपित्वातिकरुणं (१) ध्यानमेवान्वपद्यताम् ॥
तौ ध्यानमास्थितौ दृष्ट्वा पितुरिष्टः पुरोहितः ।
वशिष्ठो भरतं वाक्यमुत्थाप्येदमुवाच ह ॥
द्वन्द्वदुःखैर्जगत् (२) सर्व्वमभिभूतमिदं सदा ।
अवश्यम्भाविनं भावं (३) न त्वं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥
सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्य धरणीतलात् ।
श्रावयामास तत्त्वज्ञः सर्व्वभूतभवाभवम् (४) ॥
उत्थितौ तौ नरव्याघ्रावश्रुक्लिन्नौ विरेजतुः ।
वर्षातोयपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥
अश्रूणि परिमार्ज्जन्तौ रक्ताक्षौ दीनभाषिणौ (५) ।
अमात्यास्त्वरयामासुः पितुः प्रति जलक्रियाम् (६) ॥

---

(१) विलपित्वा विलप्य । आर्षः प्रयोगः ।

(२) द्वन्द्वदुःखैः हर्षशोकरागद्वेषादिद्वन्द्वजनितक्लेशैः ।

(३) भावं पितृवियोगरूपं विषयम् ।

(४) सर्व्वभूतभवाभवम् सर्व्वेषां प्राणिनां जन्ममृत्युनियमम् ।

(५) दीनभाषिणौ करुणविलापिनौ । भरतशत्रुघ्नाविति शेषः ।

(६) पितुर्जलक्रियां प्रति सलिलाञ्जलिदानेन पितरं तर्पयितुमित्यर्थः ।

एवं संस्कारणं कृत्वा भरतः पृथिवीपतेः।
जलक्रियां पितुर्धीमान् कर्त्तुं समुपचक्रमे॥
पुण्यां पुण्यजलाकीर्णां महर्षिगणसेविताम्।
उदकं स पितुर्दातुं (१) सरयूं सरितं ययौ॥
अवगाह्य ततः पुण्यां सरयूं सस्नुजनः।
ददौ पितरमुद्दिश्य भरतः सलिलाञ्जलिम्॥
स सर्व्वमातृसंयुक्तः सामात्यः सपुरोहितः।
तर्पयामास राजानं सलिलेन विधानतः॥

ततः कृत्वोदकं सर्व्वे पौरजानपदा (२) जनाः।
पृथगाश्वासयामासुर्भरतं शोकविह्वलम्॥
आश्वास्यमानस्तैश्चाथ प्रययौ भरतस्ततः।
तैरेव सहितः सर्व्वैरयोध्यां शोककर्षिताम्॥
दूरादेव च तां दृष्ट्वा दीनातुरजनाकुलाम्।
पुरीमयोध्यां भरतः पौरान् वचनमब्रवीत्॥
गते नरपतौ स्वर्गं रामे च वनमाश्रिते।
भातीयं मे निरानन्दा श्मशानसदृशी पुरी॥

---

(१) पितुर्दातुं पित्रे दातुम्। सम्प्रदाने षष्ठीप्रयोगः आर्षः सम्बन्धविवक्षया वा षष्ठी।

(२) पौरजानपदाः पौराः जानपदाश्च। पौराः पुरवासिनः जानपदाः जनपदवासिनः जनपदेभ्यः आगता वा।

प्रमदा हतवीरेव (१) विचन्द्रेव च सर्व्वरी।
विहीना नरदेवेन पुरीयं न विराजते॥
नेच्छाम्येतामहं द्रष्टुं न प्रवेष्टुं हतत्विषम्।
इहैव प्रायमासिष्ये पितुर्दर्शनकाङ्क्षया॥
किं मे पित्रा विहीनस्य जीवितेन सुखेन वा।
इच्छामि जीवितुं नाहमनुयास्यामि भूमिपम्॥
अथ राज्ञो महामात्यो धर्म्मपाल इति श्रुतः।
परिदेवयमानं (२) तं भरतं वाक्यमब्रवीत्॥
शोचतो मुह्यतश्चैव (३) मोघं ते भरत श्रुतम् (४)।
कुरु वाक्यं ममैवेदमनुरूपं (५) नृपात्मज॥
शोके भरत निर्बन्धं (६) नात्यर्थं कर्त्तुमर्हसि।
सर्व्वस्वजननाशेऽपि न हि शोचन्ति पण्डिताः॥
रुदतः शोचतो वापि यदि नाम पुनर्मृतः।
सञ्जीवेत् स्वजनः कश्चिन्ननु शोचेम सर्व्वशः (७)॥

---

(१) हतवीरा हतपतिका।
(२) परिदेवयमानं विलपन्तम्।
(३) मुह्यतः मोहम् आपद्यमानस्य।
(४) श्रुतं शास्त्राध्ययनम्।
(५) अनुरूपम् एतत्कालसदृशम्।
(६) निर्बन्धम् अभिनिवेशम्।
(७) सर्व्वशः सर्व्वथा सर्व्वैरेव प्रकारैरिति यावत्।

यदा त्ववश्यं गन्तव्यं सर्व्वैरस्माभिरागतैः।
मृत्युकाले तदा शोके नास्ति सामर्थ्यमण्वपि (१)॥
एह्याशु त्वं सहास्माभिरयोध्यां प्रविश प्रभो।
स्वजनं शोकसन्तप्तं समाश्वासय मानद॥
त्वं ह्यद्य नाथः सर्व्वेषामस्माकं स्वजनस्य च।
शोचितुं नार्हसि त्वं तत् प्रजानां नाथतां गतः॥
एवमुक्तः स विप्रेण धर्म्मपालेन धार्म्मिकः।
प्रविवेश निरानन्दामयोध्यां स्वजनैर्वृतः॥

---

(१) सामर्थ्यं फलोपधायकता सार्थक्यमिति यावत्।

सम्पूर्णम्।